॥ काव्यप्रकाशाचमनम् ॥

(द्वितीयाचमनम्)

७ तः १० उल्लासानां सरलसंस्कृतव्याख्या



श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम् - गुजरातम्

- प्रा. ललित पटेलः

- प्रा. पङ्कजः रावलः

॥ काव्यप्रकाशाचमनम् ॥

द्वितीयाचमनम्

(७ तः ९ उल्लासानां सरलसंस्कृतव्याख्या)

प्रेरणास्रोतांसि एवं मार्गदर्शकाः

श्रीकुलपतिवर्याः

प्रॉ. पङ्कज एल. जानीजीमहाभागाः

मार्गदर्शकाः

प्रधानाचार्याः

डॉ. नरेन्द्र एल. पण्ड्यामहाभागाः

लेखकौ

ललितः पटेलः - पङ्कजः रावलः च

(अध्यापकौ)

श्री सोमनाथसंस्कृतयुनिवर्सिटी- सञ्चालित-संस्कृत कॉलेज, वेरावलम्

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. विष्णुः पुरोहितः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम् - फरवरी, २०१३

ISBN -13 978-81-925721-4-7

मूल्यम् - रु. १००/-

मुद्रकः -

एच. के ओफसेट, वेरावलम्

अनुक्रमणिका

।। शुभाशंसनम् ।।

"देवस्य पश्य काव्यं न ममार न जीर्यति"

केवलं परमात्मनः काव्यं वैदिकसाहित्यम् एव न हि प्रत्युत तत्संकेतेन लौकिक-संस्कृतकाव्येन सह तत्सिद्धान्तप्रतिपादकं काव्यशास्त्रमपि निरन्तरं जीवति यदि यत्नः सदैव क्रियते । तद्रक्षणाय अभ्यासः अपेक्षितः वर्तते । अन्यत् च कथनीयम् अस्ति यत् प्राप्तं ज्ञानं तु कस्यचित् जनस्य तस्यैव स्वान्तःसुखाय भवति परन्तु प्रकाशितं ज्ञानं लोकसुखाय अपि भवति । श्रीसोमनाथसंस्कृतविश्वविद्यालयः पाठ्यपुस्तकानां लेखनाय सदैव अत्रस्थान् विदुषः प्रेरयति; येनास्माकं छात्राणाम् अध्ययन सौविध्यम् जायेत । अस्यैव फलमस्ति यत् अद्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य **"स्वर्णिमगुजरातजयन्ती"**-अवसरे तथा बेङ्गलूरुनगरे आयोजितायां **विश्वसंस्कृतपुस्तकमेलायां** कतिपयानां पाठ्यपुस्तकानाम् अन्येषामपि सन्दर्भग्रन्थानां प्रकाशनं भवति । एतत् प्रकाशनं विलोक्य हर्षो मे जायते । अस्याम् एव श्रृङ्खलायां एतदपि **"काव्यप्रकाशाचमनम्"** काव्यशास्त्रीयं पुस्तकम् आचार्यकक्षायाः (साहित्यस्य) छात्राणां कृते **श्री ललित पटेल**-महोदयेन तथा च **श्री पङ्कज रावल** महोदयेन यत् संपादितम् वर्तते - तस्य प्रकाशनं विलोक्य प्रसन्नता मयि जायते, अत्र सप्तमोल्लासप्रभृति-दशमोल्लासगताः काव्यप्रकाशस्य विषयाः छात्राणाम् उपयोगाय सरल-शैल्यां निरूपिताः वर्तन्ते । अस्य सफलतायै कामनां कुर्वन् अहं अस्य ग्रन्थस्य निर्देशकमहोदयानां कृते तथा च सम्पादकानां कृते वर्धापनं, शुभाशंसनम् च ददामि ।

"वेदः स्वस्ति"

प्रॉ. पङ्कज एल. जानी

कुलपतिः

।। पुरोवाचः ।।

काव्यप्रकाशग्रन्थस्य सुखबोधाय सद्धियाम् ।।
कृतं काव्यप्रकाशयस्याचमनं संस्कृतान्वितम् ।। १ ।।

अस्मिन्नधीयमाने तु जिज्ञासुच्छात्रसद्गणः ।।
प्रकाशे लभते नूनं प्रवेशं सुखरूपतः ।।२ ।।

सरलं संस्कृतं चाऽत्र सुखबोधः प्रयोजनम् ।।
विषयस्य प्रवेशाय कृतमाचमनं बुधैः ।।३ ।।

वयमाशास्महेऽमुष्य ग्रन्थस्य सम्प्रसारताम् ।।
छात्राणां ग्रन्थरुच्यै स्यात् ग्रन्थबोधाय सर्वथा ।।४।।

डॉ. नरेन्द्रकुमार एल. पण्ड्या

।। प्रस्तावना ।।

कृतं श्रीमम्मटाचार्यवर्यैः वाग्देवतावरैः।
काव्यप्रकाशपीयूषं वहतु मे सदा हृदि।।

आचार्यभरतात् प्रारब्धा साहित्यशास्त्रधारा कविराजजगन्नाथपर्यन्त-अजस्त्र-प्रवाहिता आसीत्। तत्र गङ्गारूपा काश्मीरी-परम्परा तथा च यमुनारूपा मालवपरम्भ्परा। तत्रापि काव्यप्रकाश: पवित्रनिर्झरवत् लब्धप्रतिष्ठित: ग्रन्थ:। वाग्देवतावतारध्वनि-पुन:प्रतिष्ठापकराजानकमम्मटाचार्येण रचित: काव्यप्रकाश: दुर्गम: तथापि साहित्यशास्त्रज्ञानाय एकं प्रस्थानम्। काव्यप्रकाशस्य टीकाकारेण महेश्वरभट्टाचार्येण उक्तम् -

काव्यप्रकाशस्य कृता गृहे गृहे
टीकास्तथाप्येष तथैव दुर्गमः।

व्याकरणशास्त्रे यद् स्थानं पतञ्जलिना रचित-महाभाष्यस्य, वेदान्ते यद् स्थानं शङ्कराचार्येण रचितशारीरिकभाष्यस्य च तद् स्थानं साहित्यशास्त्रे मम्मटकृत-काव्यप्रकाशस्य प्रतिष्ठितम्। वाग्देवतावतारश्रीमम्मटभट्टप्रणीत: काव्यप्रकाशोऽयम् अलङ्कारशास्त्रग्रन्थेष्वेकतमो निबन्ध:। साहित्यशास्त्रस्य सर्वेऽपि विषया: प्राय अत्र प्रतिपादिता:। एतस्य ग्रथस्य उपरि बह्वयो टीका: संवृता:। प्राय: भारते सर्वेषु विश्वविद्यालयेषु अयं ग्रन्थ: आचार्यशास्त्रिपरीक्षासु पाठ्यते। अत: बालानां सुखबोधाय पठनयोग्यम् एकं सन्दर्भसाहित्यं सरल-संस्कृतमाध्यमेन आवाभ्यां प्रकाशनी म् इति निर्णय: कृत:। यदा आवां कक्षायां काव्यप्रकाशं पाठयाव: स्म तदा आवाभ्य चिन्तितं यद्-केन प्रकारेण छात्रा: ग्रन्थं सम्यग् अवगच्छेयु: ? केन प्रकारेण आवाभ्यां पाठनीयम् ? केन प्रकारेण च आवयो: पाठनं रसमयं भवेत् ? इति।

तेषां प्रश्नानां समाधानाय अत्र प्रायः सर्वेऽपि विषयाः सरलया सरसतया च आवाभ्यां चर्चिताः। विदुषां कृते एषः यत्नः न, अपि तु अनेन काव्यप्रकाशाचमनेन विद्यार्थिनाम् उपकारः भविष्यति इति आशास्महे। क्व काव्यप्रकाशग्रन्थः क्व चाल्पविषया मतिः आवयोः। काव्यप्रकाशाचमनं कर्तुं कुत्रापि एतस्य दुर्गमग्रन्थस्य विचारान् प्रकटीकर्तुं व्युत्पत्तिन्यूनतया यदि दोषाः अभविष्यन् तर्हि तान् दूरीकृत्य क्षन्तव्यौ आवाम्।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मा. कुलपति **श्री पङ्कज एल. जानीजी** महाभागेभ्यो धन्यवादान् वितरावः, येषां प्रेरणयाऽध्यापनादि-विविध-कार्यव्यग्रोऽपि अस्य पुस्तकस्य लेखने संलग्नौ अभवाव। आचार्य **डॉ. नरेन्द्रकुमार एल. पण्ड्याजी** महाभागेभ्य अपि धन्यवादान् प्रयच्छावः, येषां मार्गदर्शनेन गूढाः विषयाः अपि स्फुटीभूताः। **डॉ. देवेन्द्रनाथ पाण्डेयजी** महाभागान् कथं विस्मरेव? मुहुर्मुहुः तेषां मार्गदर्शनं साहाय्यं च प्राप्तमेव। सङ्गणकक्षेत्रे येषां महती गतिः तान् हमीरभाईआहिरवर्यान् धन्यावादान् समर्पयावः, यैः झटिति समयानुगुणं मुद्रणं सम्पादितम्। सरस्वत्याः कृपा सदा विलसेत् इत्याशया इत्युक्त्वा विरमावः।

लेखकौ

ललितपङ्कजौ

।। साहित्यशास्त्रे सम्प्रदायाः ।।

साहित्यशास्त्रस्य अध्ययनात् अनुशीलनात् वा ज्ञायते यत् एतस्मिन् शास्त्रे विविधाः सम्प्रदायाः विद्यमानाः सन्ति। काव्यात्मभूततत्त्वं किम् ? एतस्मिन् विषये मतभेदात् सम्प्रदायानां चर्चा उद्भूता। आत्मभूततत्त्वे सति काव्यत्वं विद्यते तत् तत्त्वं किम् ? एतस्य प्रश्नस्य निराकरणाय अनेके सम्प्रदायाः समुद्भूताः। भरतात् आरभ्य पण्डितराज-जगन्नाथपर्यन्तं ये आचार्याः अभवन् ते कस्मिन् अपि सम्प्रदाये अन्तर्भूताः भवन्ति। 'रसः एव काव्यस्य आत्मा' एवं वदन्तः आचार्याः रससम्प्रदाये अन्तर्भूताः। 'काव्ये तु अलङ्कारस्य प्राधान्यम्' इति जानन्तः आचार्याः अलङ्कारवादिनः 'रीतिरात्मा काव्यस्य' इति उद्घोषयन्तः रीतिसम्प्रदाय-वादिनः। 'वक्रोक्तिः काव्यजीवितम्' अतः वक्रोक्तिः एव काव्यस्य आत्मा इत्येकं मतम्। 'ध्वनिः एव काव्यस्य आत्मा' एवं वदन्तः ध्वनिवादिनः कथ्यन्ते। औचित्यमेव काव्यसर्वस्वं मन्वानाश्च औचित्यवादिनः सन्ति। एवं साहित्यशास्त्रे मुख्यत्वेन षट् सम्प्रदायाः (विचारपरम्पराः) प्रायः भवन्ति।

क्रमः	**सम्प्रदायः**	**प्रवर्तकः आचार्यः**	**ग्रन्थः**
१.	रससम्प्रदायः	भरतमुनिः	नाट्यशास्त्रम्
२.	अलङ्कारसम्प्रदायः	भामहः	काव्यालङ्कारः
३.	रीतिसम्प्रदायः	वामनः	काव्यालङ्कारसूत्रम्
४.	वक्रोक्तिसम्प्रदायः	कुन्तकः	वक्रोक्तिजीवितम्
५.	ध्वनिसम्प्रदायः	आनन्दवर्धनः	ध्वन्यालोकः
६.	औचित्यसम्प्रदायः	क्षेमेन्द्रः	औचित्यविचारचर्चा

१. रससम्प्रदायः

सर्वेषु सम्प्रदायेषु मुख्यः प्राचीनः सम्प्रदायः एषः। भरतमुनिः रससम्प्रदायप्रवर्तकः। यद्यपि 'काव्यमीमांसा' इति ग्रन्थे राजशेखरः नन्दिकेश्वरं भरतात् पूर्वं रससिद्धान्तप्रतिष्ठापकं मन्यते किन्तु तस्य ग्रन्थः न उपलभ्यते। अतः रसविषयकं विवेचनं सर्वप्रथमं भरतमुनेः नाट्यशास्त्रे एव उपलभ्यते। "**विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः**" इति रससूत्रं रससिद्धान्तस्य

प्राणभूतं वर्तते । परवर्तिनः आचार्याः तस्योपरि एव रसविवेचनं कृतवन्तः । अतः भरतमुनिः रससम्प्रदायस्य आदिप्रवर्तकः । नाट्यशास्त्रस्य षष्ठे अध्याये रसानाम् एवं सप्तमे भावानां विस्तारपूर्वकं भरतमुनिना विवेचनं कृतम् । भट्टनायकः शङ्ककः भट्टलोल्लटः अभिनवगुप्तपादादयः आचार्याः रससिद्धान्तस्य प्रमुखव्याख्याकाराः प्रसिद्धाः । काव्यप्रकाशे तेषां मतानां विषये विस्तृतचर्चा वर्तते । ध्वनिवादिनः आचार्या अपि 'रसध्वनिः' काव्यस्य आत्मा इति वदन्ति । **न हि रसादृते कश्चिदर्थः प्रवर्तते ।**

२. अलङ्कारसम्प्रदायः

कालक्रमात् भरतानन्तरं जातः आचार्यः भामहः अलङ्कार-सम्प्रदायस्य प्रवर्तकः । उद्भट-दण्डि-रुद्रट-प्रतिहारेन्दुराज-जयदेवादयः अलङ्कारवादिनः आचार्याः । तेषां मतानुसारं रसोऽस्ति किन्तु काव्ये प्रमाणभूतं जीवनविधायकं तत्त्वम् अलङ्कारः । अलङ्कारविहीनकाव्यम् इत्युक्ते उष्णताविहीनवह्निः । अतः 'चन्द्रालोक' इति ग्रन्थे जयदेवः कटाक्षपूर्वकं वदति यत् -**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती । असौ न मन्यते कस्मादनुष्णमनलङ्कृती ॥** तेषाम् अनुसारं काव्यस्यात्मा अलङ्कारः । रस-भावादीनाम् अन्तर्भावं ते रसवदलङ्कारे कुर्वन्ति । रसवत्-प्रेय-ऊर्जस्वि-समाहिताः एते चत्वारः रसवदलङ्काराः । '**रसवद्दर्शितस्पष्टशृङ्गारादरसं यथा**' -भामहः

३. रीतिसम्प्रदायः

रीतिसम्प्रदायस्य प्रवर्तकः वामनः । वामनद्वारा लिखितः ग्रन्थः 'काव्यालङ्कारसूत्रवृत्तिः' इति । अलङ्कारस्य अपेक्षया रीतिः काव्ये प्रधानमस्ति इति तस्य मतम् । 'रीतिरात्मा काव्यस्य' इति तस्य प्रमुखः सिद्धान्तः । वामनः रीतेः विवेचनां करोति यत् - '**विशिष्टपदरचना रीतिः**' तत्र विशेष इत्युक्ते - 'विशेषो गुणात्मा' अर्थात् - काव्यरचनायां माधुर्यादिगुणानां सन्निवेशः विशेषता । सा विशेषता एव रीतिः इति कथ्यते । एवं गुणरीत्योः घनिष्ठः सम्बन्धः वर्तते । अतः एषः सम्प्रदायः 'गुणसम्प्रदायः' इति नाम्ना अपि प्रसिद्धः । वामनः गुणालङ्कारयोः भेदं दर्शयति यत् - '**काव्यशोभायाः कर्तारो धर्माः गुणाः ।**' '**तदतिशयहेतवस्त्वलङ्काराः ।**' अर्थात् गुणाः काव्यशोभायाः उत्पादकाः । अलङ्काराः तु केवलं काव्यशोभायाः अभिवर्धकाः भवन्ति । एवं वामनेन अलङ्कारस्य प्रधानतां समाप्य रीतेः प्रधानतायाः प्रतिपादनं कुर्वता रीतिसम्प्रदायस्य स्थापना कृता । मम्मटादयः आचार्याः रीतेः उपयोगितायाः स्वीकारं कुर्वन्ति किन्तु काव्यस्यात्मरूपेण स्वीकारं न कुर्वन्ति । तेषां

मतानुगुणम् '**रीतयोऽवयवसंस्थानविशेषवत्** ।' इति ।

४. वक्रोक्तिसम्प्रदाय:

वक्रोक्तिसम्प्रदायस्य संस्थापक: वक्रोक्तिजीवितकार: कुन्तक: अस्ति। स: रीते: प्रधानतां समाप्य वक्रोक्ते: प्रधानतां स्थापयति। भामह: अपि वक्रोक्तिं स्वीकरोति। **सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते**' वामनोऽपि – 'सादृश्याल्लक्षणा वक्रोक्ति:' उक्त्या वक्रोक्तिम् अङ्गीकरोति। किन्तु भामहादीनां मतानुसारं वक्रोक्ति: अलङ्काररूपा एव भवति । कुन्तक: वक्रोक्त्यै गौरवं दत्तवान् अत: स: वक्रोक्तिसम्प्रदायस्य प्रतिष्ठापक: । स: 'वक्रोक्तिजीवितम्' इति विशालं महत्त्वपूर्णं च ग्रन्थं रचितवान् । वामनेन देशभेदस्य उपरि पाञ्चाली–वैदर्भी–गौडीत्यादय: रीतय: कृता: । ता: रीतय: कुन्तकेन रचनाशैली–द्वारा क्रमश: मध्यममार्ग: सुकुमारमार्ग: विचित्रमार्ग: इति नाम्ना उक्ता:।

५. ध्वनिसम्प्रदाय:

आनन्दवर्धनाचार्य: ध्वनिसम्प्रदायस्य प्रवर्तक: । तेन लिखित: ग्रन्थ: 'ध्वन्यालोक:' वर्तते। तत्र 'काव्यस्यात्मा ध्वनि:' इति तस्य सिद्धान्त: । एतेषु सर्वेषु सम्प्रदायेषु एष: प्रबल: महत्त्वपूर्ण: च सम्प्रदाय:। एतस्य विरोधरूपेण व्यक्तिविवेकादय: बहव: ग्रन्था: विद्वद्भि: लिखिता: । किन्तु यथा अग्निना सुवर्णं शुद्धं भवति तथा विरोधात् ध्वनिसिद्धान्त: अधिकाधिकं प्रतिष्ठित: अभवत् । ध्वनिसिद्धान्तविरोधार्थं वैयाकरणा: मीमांसका: नैयायिकाश्च कोलाहलं कृतवन्त: । किन्तु अन्ते मम्मटाचार्येण प्रबलयुक्तिद्वारा सर्वेषां खण्डनं कृत्वा ध्वने: स्थापना कृता। अत: मम्मटाचार्य 'ध्वनिप्रतिष्ठापोषक: परमाचार्य:' इति प्रसिद्ध:। अनन्दवर्धन: ध्वने: व्याख्यानं करोति यत् – **यत्रार्थ: शब्दो वां तमर्थमुपसर्जनीकृतस्वार्थौ । व्यङ्क्त: काव्यविशेष: स ध्वनिरिति सूरिभि: कथित: ॥**

६. औचित्यसम्प्रदाय:

औचित्यसम्प्रदायस्य संस्थापक: आचार्य: क्षेमेन्द्र: । 'औचित्यविचारचर्चा' इति तस्य ग्रन्थ: । स: औचित्यं महत्त्वपूर्णे गौरवपदे स्थापितवान् । आनन्दवर्धनाचार्योऽपि औचित्यस्य महत्त्वं प्रतिपादयति "**अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् । औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥**" क्षेमेन्द्रानुसारम् औचित्यमित्युक्ते 'उचितभाव:' । **उचितं प्राहुराचार्या: सदृशं किल**

यस्य यत् । उचितस्य च यो भावः तदौचित्यं प्रचक्षते ॥ भरतात् जगन्नाथपर्यन्तं द्विसहस्त्रं वर्षाणि यावत् एतेषां सम्प्रदायानां विकासः मतान्तरसिद्धान्तसहितम् अभवत् । प्रायः पञ्चचत्वारिंशद् विद्वांसः आचार्याः साहित्यशास्त्रस्य विकासे योगदानं दत्तवन्तः । साहित्यशास्त्रे प्रवेशाय एतेषां सम्प्रदायानां परिचयस्य उपकारकत्वात् आवश्यकता स्यादेव ।

०००

॥ आचार्यमम्मटस्य जीवनं समयः कृतयः च ॥

ऐतिहासिकविषये संस्कृतसाहित्यस्य स्थितिः समाधानकारिका नास्ति । बहूनां साहित्यकाराणां जीवनविषये स्वल्प एव परिचय उपलभ्यते तथैव मम्मटस्य विषयेऽपि विशेषवृत्तं न प्राप्यते । एकादशख्रैष्टशताब्दे भारतीय साहित्याकाशे आचार्यमम्मटरूपस्य जाज्वल्यमानस्य नक्षत्रस्योदयः अभवत् । दुर्दैवात् मम्मटजीवनवृत्तान्तविषयकं प्रामाणिकवृत्तं न उपलभ्यते तथापि काव्यप्रकाशस्य केचन टीकाकाराः जनश्रुतिद्वारा आचार्यमम्मटस्य जीवनविषये उल्लेखं कुर्वन्ति ।

१. मम्मटाचार्यस्य जीवनम् —

(अ) सुधासागरकार–भीमसेनदीक्षितानुसारम् ।

'सुधासागरः' (शुद्धोदधिः) इति भीमसेनदीक्षितेन लिखितः काव्यप्रकाशस्य टीकाग्रन्थः । तत्र भीमसेनेन मम्मटस्य परिचायकरूपेण कानिचित् पद्यानि लिखितानि । यथा –

शब्दब्रह्म सनातनं न विदितं शास्त्रैः क्वचित् केनचित्
तद्देवी हि सरस्वती स्वयमभूत् काश्मीरदेशे पुमान् ।
श्रीमज्जैयटगेहिनीसुजठराज्जन्माप्य युग्मानुजः
श्रीमन्मम्मटसंज्ञया श्रिततनुं सारस्वतीं सूचयन् ॥
मर्यादां किल पालयन् शिवपुरीं गत्वा प्रपठ्यादरात्
शास्त्रं सर्वजनोपकाररसिकः साहित्यसूत्रं व्यधात् ।
कस्तस्य स्तुतिमाचरेत् कविरहो को वा गुणान् वेदितुं
शक्तः स्यात् किल मम्मटस्य भुवने वाग्देवतारूपिणः ॥
श्रीमान् कैयटऔवटौ ह्यवरजौ यच्छात्रतामागतौ
भाष्याब्धिं निगमं यथाक्रममनुव्याख्याय सिद्धिं गतौ ।

अत्र प्रतीयते यत् मम्मटः काश्मीरनिवासिनः जैयटस्य पुत्र आसीत्। सः वाराणसीं गत्वा विद्याभ्यासं कृतवान् । महाभाष्यटीकाकारः कैयटः तथा च यजुर्वेदभाष्यकारः उव्वटः तस्य कनीयांसौ भ्रातरौ आस्ताम्। भीमसेनदीक्षितानुसारं सरस्वती स्वयं काश्मीरदेशे पुमान् अभूत् । अतः मम्मटः 'वाग्देवतावतारः' । किन्तु वाजसनेयीसंहितायाम् उव्वटानुसारं तस्य पितुः नाम वज्रटः, न तु जैयटः, सः आनन्दपुरे वसति स्म ।

(आ) जनश्रुतिः -

द्वितीया एका अनुश्रुतिः वर्तते यत् आचार्यमम्मटः नैषधीयचरितकर्तुः श्रीहर्षस्य मातुल आसीत् । श्रीहर्षेण स्वस्य महाकाव्यं मम्मटं दर्शितम् । मातुलेन मम्मटेन उक्तं यत् - 'भागिनेय ! यदि त्वया इदं काव्यं पूर्वम् अदर्शिष्यत तर्हि मया काव्यप्रकाशे दोषदर्शनविषये उदाहरणानि समाहर्तुं यत् वृथा यत्नः कृतः तत् न अभविष्यत्' इति । यद्यपि एतस्याम् ऐतिहासिकता न प्रतिभाति । पुनः मम्मटश्रीहर्षौ न तु समानकालिकौ।

२. जन्मस्थानम् -

आचार्यमम्मटस्य जन्म काश्मीरप्रदेशे अभवत् । काश्यां स विद्याध्ययनं कृतवान् पुनः तत्रैव काव्यप्रकाशं रचितवान् । मम्मटः काश्मीरनिवासी आसीत् तस्य कृते अधो लिखितानि प्रमाणानि सन्ति -

- निदर्शनटीकायामपि 'मम्मटः काश्मीरदेशे अभवत्' इति उल्लेखः वर्तते ।
- अल्लट-रुद्रट-भल्लट-लोल्लटवत् मम्मटस्यापि नाम अनुकरणेन टकारान्तत्वात् काश्मीरदेशीयम् इति निश्चेतुं शक्यते ।
- काश्मीरप्रणालिकानुसारं 'राजानक' इत्युपाधिना मम्मटः सम्मानितः आसीत् ।
- काव्यप्रकाशस्य पञ्चमे उल्लासे 'चिडकु'शब्दस्य प्रयोगः मम्मटेन कृतः । काश्मीरभाषायां 'चिडकु' अश्लीलार्थबोधकः ।

काश्मीरप्रदेशस्य आनन्दपुरम् मम्मटस्य जन्मस्थानमस्ति । तथापि केचन गुजराते विद्यमानं वडनगरं मम्मटस्य जन्मस्थानं मन्यन्त । तत् अप्रामाणिकम् इति प्रतिभाति । केचन सुधासागरकारेण दत्तं मम्मटवृत्तम् अप्रामाणिकतया पश्यन्तः सन्ति । यथा आफ्रेट - 'मूर्खपरम्परा' (A silly tradition) इति वदति । पुनः मम्मटानन्तरं षट्शततमे वर्षे भीमसेनदीक्षितः अभवत् । अतः एतत् सर्वं चिन्तनीयं भवति ।

३. आचार्यमम्मटस्य समयः -

आचार्यमम्मटस्य आविर्भावः तस्मिन् समये अभवत् यस्मिन् समये काश्मीरदेशे नूतनसाहित्यचेतनायाः स्फुरणं भवति स्म । अन्तर्बाह्यप्रमाणैः मम्मटस्य समयः १०५०तमखैष्टाब्दात् ११००तमखैष्टाब्दपर्यन्तं निर्धारयितुं शक्यते । यतः -

(१) मम्मटः अभिनवगुप्तस्य तथा च नवसाहसाङ्कचरितस्य उल्लेखं करोति । तयोः समयः क्रमशः १०१५ तः १००५ खैष्टाब्दाः इति निश्चितम् । (२) उदात्तालङ्कारोदाहरणे भोजराजस्यापि उल्लेखः मम्मटेन कृतः यत्- 'यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम्' इति । भोजराजस्य शासनकालः १०५४तम-खैष्टाब्दाद् अनन्तरं नास्ति । उपर्युक्तप्रमाणद्वयेन काव्यप्रकाशस्य निर्माणकालः १०५०तम-खैष्टाब्दात् प्राक् न स्यात् इति निश्चितं भवति । इत्थं काव्यप्रकाशस्य पूर्वसीमास्ति । तथैव काव्यप्रकाशस्य उत्तरसीमापि ११४३ खैष्टाब्दात् अग्रे वक्तुं न शक्नुमः । यतः -(१) हेमचन्द्राचार्येण काव्यानुशासनं प्रायः ११४३तमे खैष्टाब्दे रचितम्। तस्मन् मम्मटस्य उल्लेखः अस्ति । (२) माणिक्यचन्द्रेण ११५९-६०तमे खैष्टाब्दे काव्यप्रकाशस्य सङ्केतनामा टीकाग्रन्थः लखितः । एतेन स्पष्टीभवति यत् १२खैष्टशताब्द्याः पूर्वं मम्मटस्य काव्यप्रकाशस्य ख्याति जाता आसीत्। अतः काव्यप्रकाशस्य निर्माणकालः १०५०तमखैष्टाब्दात् ११००तमखैष्टाब्दपर्यन्तं ज्ञातव्यः ।

४. मम्मटाचार्यस्य कृतयः -

(१) काव्यप्रकाशः -

काव्यप्रकाशः भारतीयालङ्कारशास्त्रस्य अद्वितीयः ग्रन्थः । अलङ्कारशास्त्रे काव्यप्रकाशस्य विशिष्टं स्थानं वर्तते । साहित्यशास्त्रे वर्षेभ्यः प्रवाहितः एषः गङ्गाप्रवाहः उत्तरकालिकानां समग्राणां सिद्धान्तानां मूलस्रोतोरूपः काव्यप्रकाशः । वेदान्तदर्शने शारीरकभाष्यस्य यत् महत्त्वं विद्यते, व्याकरणशास्त्रे महाभाष्यस्य यत् अनुपमं स्थानं वर्तते तत् स्थानं साहित्यशास्त्रे मम्मटकृतकाव्यप्रकाशस्य विद्यते । Like the SHAREERAK-BHASHYA in Vedanta or the MAHABHASHYA in Grammar, the KAVYAPRAKASHA becomes a starting point for future exegesis and expansion - History of Sanskrit Poetics काव्यप्रकाशः साहित्यशास्त्रस्य आकरग्रन्थः । अतः सुधासागर-कारेण भीमसेनदीक्षितेन मम्मटः 'वाग्देवतावतारः' इति उक्तम् ।

काव्यप्रकाशस्य सङ्कलनम् -

दशसु उल्लासेषु काव्यप्रकाशे काव्यशास्त्रस्य निरूपणमभवत् । 'तददोषौ शब्दार्थौ सगुणावनलङ् कृती पुनः क्वापि' । काव्यलक्षणं काव्यप्रकाशस्य अनुक्रमसूचिः । प्रथमे उल्लासे काव्यप्रयोजन-काव्यहेतु-काव्यलक्षण-काव्यभेदादीनां निरूपणम् । द्वितीयोल्लासे वाचक-लक्षक-व्यञ्जकशब्दनिरूपणं तथा च वाच्य-लक्ष्य-व्यङ्ग्यार्थविवेचनम् । तृतीये आर्थीव्यञ्जनायाः प्रकाराणां स्पष्टीकरणम् । चतुर्थे उल्लासे ध्वनिप्रकाराणां तथा रसमीमांसायाः विवेचनम् । गुणीभूतव्यङ्ग्यस्य अष्टप्रकाराणां तथा च व्यञ्जनावृत्तिस्थापना पञ्चमे उल्लासे विद्यते । षष्ठे उल्लासे चित्रकाव्यस्य निरूपणम् । काव्यदोषाणां सोदाहरणं स्पष्टीकरणं सप्तमोल्लासे । नवमे शब्दालङ्काराणां गुणवृत्तीनां विवरणम् । दशमे ६१ अर्थालङ्काराणां सोदाहरणं सम्यक् विवेचनम् । काव्यप्रकाशस्य त्रयः अंशाः (१) कारिका (२) वृत्तिः (३) उदाहरणानि । काव्यप्रकाशे १४२ कारिकाः सन्ति । तासां कारिकाणां २१२ सूत्रेषु विभाजनं कृतमस्ति । कारिकायाः उपरि गद्यवृत्तिः नानाविध-ग्रन्थेभ्यः ६०० उदाहरणानि मम्मटेन उद्धृतानि ।

(२) शब्दव्यापारविचारः -

शब्दव्यापारविचारनामा शब्दवृत्तिविवेचनयुक्तः लघुवपुः अपरः ग्रन्थोऽपि मम्मटेन रचितः । निर्णयसागरमुद्रणालयद्वारा तस्य प्रकाशनमभवत् । एतस्मिन् ग्रन्थे अभिधालक्षणयोः विस्तारपूर्वकं वर्णनं मम्मटाचार्येण कृतमस्ति ।

।। काव्यप्रकाशग्रन्थकर्तृत्वसमस्या ।।

काव्यप्रकाशस्य ग्रन्थकर्तृत्वस्य समस्या विचित्रा वर्तते। काव्यप्रकाशस्य कर्ता भिन्नोऽभिन्नो वेत्यत्र सन्ति विदुषां विप्रतिपत्तयः। काव्यप्रकाशस्यान्तिमः श्लोक एव विप्रतिपत्तीनां च मुख्यतयाऽऽधारः-

इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरुपः प्रतिभासते यत्।
न तद्विचित्रं यदमुत्र सम्यग् विनिर्मिता सङ्घटनैव हेतुः।।

यद्यपि काव्यप्रकाशस्य कर्तारूपेण मम्मटाचार्य एव प्रसिद्धः। यदि मम्मटाचार्यैव काव्यप्रकाशस्य कर्ता इति अङ्गीकुर्मः तर्हि कारिकावृत्तयोः लेखकोऽपि मम्मट इति ज्ञायते, किन्तु विद्वत्समाजे मतभेदः। सः मतभेदः इत्थं वर्तते- (१) कारिकाकारः भरतमुनिः तथा च वृत्तिकारः मम्मटः। (२) परिकरालङ्कारवधिः कारिका-वृत्तिभागः मम्मटेन लिखितः अवशिष्टः च भागः अल्लटसूरिणा रचितः। (३) संपूर्णः काव्यप्रकाशः

मम्मटाल्लटयोः संयुक्तरचना। (४) कारिकावृत्तयोः रचनाकारः आचार्यमम्मट एव।

(१) कारिकाकारः भरतः तथा च वृत्तिकारः मम्मटः।

केषाञ्चित् विदुषां मतानुसारं कारिकाभागस्य निर्माता भरतमुनिः तथा च वृत्तिभागस्य निर्माता-आचार्यमम्मटो वर्तते। ग्रन्थकर्तृत्वविषये डॉ. पी. वी. काणेमहोदयस्य विवेचनमत्र प्रस्तूयते। साहित्यकौमुद्यां विद्याभूषणेनोक्तम् यत् ''सूत्राणां भरतमुनीशवर्णितानां वृत्तीनां-मितवपुषां कृतौ ममास्या मम्मटाद्युक्तिमाश्रित्यमितां साहित्यकौमुदीम्। वृत्तिं भरतसूत्राणां श्रीविद्याभूषणो व्याधात्॥'' सप्तदशशताब्दौ पूर्वं महेश्वरकृतः 'काव्यप्रकाशभावार्थ-चिन्तामणि' नाम्नः टीकाग्रन्थे 'भरतः काव्यप्रकाशस्य कारिकाकारः इति चोक्तम्। एतस्य मतस्य कृते त्रिणि प्रमाणानि- १. काश्चन कारिकाः काव्यप्रकाशे तथा च नाट्यशास्त्रे समानाः। यथा-

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बिभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृता॥
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः॥
निर्वेदग्लानिशङ्का ----------------
------------ समाख्यातास्तु नामतः॥

काव्यप्रकाशस्य चतुर्थे उल्लासे विद्यमाना एताःकारिकाः नाट्यशास्त्रस्य षष्ठाध्यायस्य १५, १७, १८,२१ कारिकातः स्वीकृताः। २. काव्यप्रकाशस्य प्रथमे उल्लासे 'ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति' इति लिखितम्। तेन स्पष्टीभवति यत् कारिकाकारः वृत्तिकारश्च भिन्नः। ३. दशमे उल्लासे 'समस्तवस्तुविषयं श्रौता आरोपिता यदा' इति कारिकाभागस्य 'बहुवचनमविवक्षितम्' नाम्ना वृत्तिभागे मतभेदः। यदि कारिकाकारः वृत्तिकारश्च समानः अभविष्यत् तर्हि कारिकायां बहुवचनस्य स्थाने एकवचनस्य प्रयोगः भविष्यति।

यदि चिन्तनं कुर्मः चेत् त्रयाणां प्रमाणानां खण्डनं भवति। यथा- १. काव्यप्रकाशे १४२ कारिकाः सन्ति। केवलं चतुर्थ-उल्लासस्य षट्कारिका एव भरतनाट्यशास्त्रस्य सन्ति। काव्यप्रकाशस्य एतस्मिन् उल्लासे एव रसमीमांसा कृताऽस्ति। पुनश्च 'नाट्यशास्त्रम्' रसमीमांसाया अग्रगण्यः ग्रन्थश्च आसीत्। अतः ततः कारिकाः स्वीकर्तुं न्यूनतायाः अनुभूतिः न भवति। मम्मटः तु अन्यस्मात् ग्रन्थात् अपि अक्षरशः कारिकाः स्वीकरोति।

यथा सप्तमे उल्लासे काव्यालङ्कारात् **'कर्णावतंसादिपदे वर्णादि ध्वनिनिर्मितिः।'** मम्मटेन दर्शितः गुणालङ्कारभेदेऽपि ध्वनिकारस्य प्रभावः दरीदृश्यते। एवम् अन्येषाम् आलङ्कारिकाणां विचारान् योग्यसन्दर्भे प्रकटीकर्तुं मम्मटाचार्यः ईषदपि न्यूनतां न अनुभवति। २. **'ग्रन्थकृत् परामृशति'** इति प्रयोगेण ग्रन्थकारः स्वस्य निराभिमानतां प्रदर्शयति। अत्र तु प्राचीनसंस्कृतसाहित्यकाराणाम् एषा परम्परा कारणीभूता। अतैव अन्यपुरुषस्य प्रयोगः। ३. **'समस्तवस्तुविषयं श्रौता आरोपिता यदा'** तथा च 'बहुवचनमविवक्षितम्' इति कारिकावृतिर्मध्ये वास्तविकः भेदः न अपि तु सूक्ष्मावलोकनाभावेन अत्र विरोधः प्रतिभाति। वस्तुतः अत्र मम्मटाचार्यः सूचयितुमिच्छति यत् समस्तवस्तुविषयः द्वाभ्यां वा अधिकालङ्कारैः भवति। अथवा पादपूरणार्थेऽपि 'आरोपिताः' इति पदं स्थापितं स्यात्। अतः कारिकाकारः वृत्तिकारश्च अभिन्नः।

२ मम्मटाचार्यः तथा च अल्लटसूरिः-

मम्मटाल्लटौ संयुक्तरुपेण काव्यप्रकाशं लिखितवन्तौ। युग्मकर्तुत्वविषयेऽपि विदुषां मतभेदाः वर्तन्ते। परिकरालङ्कारावधिः कारिकावृत्तिर्भागः मम्मटेन लिखितः। अवशिष्टः संपूर्णभागः अल्लटसूरिणा लिखितः। काव्यप्रकाशस्य **'इत्येषमार्गो---०'** इति अन्तिमश्लोकस्य सङ्केतकारः माणिक्यचन्द्रसूरिणा व्याख्यायते यत्- 'अथ चायं ग्रन्थोऽन्येनारब्धोऽपरेण च समापित इति द्विखण्डोऽपि सङ्घटनावशादखण्डायते।' तेन ज्ञायते काव्यप्रकाशस्य आरम्भः मम्मटाचार्येण कृतः किन्तु समापनं अन्येन कृतम्। 'काव्यप्रकाशनिदर्शना' नाम्ना टीकाग्रन्थस्य लेखकः राजानकः आनन्दोऽपि स्पष्टतया उल्लेखयति यत्-

'कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः।
ग्रन्थः सम्पूरितः शेषं विधायाल्लटसूरिणा॥'

(३) संपूर्णः काव्यप्रकाशः मम्मटाल्लटयोः संयुक्तरचना

यथा 'नाट्यदर्पणः रामचन्द्रगुणचन्द्रयोः संयुक्तरचना तथैव काव्यप्रकाशोऽपि मम्मटाल्लटयोः संयुक्तरचना। अमरुकशतकस्य टीकाकारः अर्जुनवर्मवनदेव एतस्य मतस्य पुष्टिं करोति। 'भवतु विदितं' इति श्लोकस्य व्याख्यायां सः लिखति यत्- 'यथोदाहृतं दोषनिर्णये मम्मटाल्लटाभ्याम्'। अतः स्पष्टीभवति यत् सप्तमः उल्लासः वा संपूर्णः काव्यप्रकाशः द्वयोः संमिलितरचना वर्तते। पुनश्च सङ्केतटीकायाः अन्ते पुष्पिकायां लिखितं यत्- 'राजानक-मम्मट-अलक-रुचकानाम्'। तेन मम्मटालकरुचकानां संयुक्तकृतिः काव्यप्रकाशः।

(४) कारिकावृत्त्योः रचनाकारः आचार्यमम्मटः

यदि सूक्ष्मतया पश्यामश्चेत् स्पष्टं भवति यत् कारिकाः वृत्तिः च आचार्यमम्मटस्यैव रचना। एतानि प्रमाणानि तस्य कृते मम्मटेन कुत्रापि नोक्तं यत् सः कारिकाया उपरि वृत्तिं लिखति। पुनः वृत्याः भिन्नं मङ्गलमपि न कृतम्। 'कारणान्यथ कार्याणि---०' इति कारिकां स्पष्टीकर्तुं 'उक्तं हि भरतेन' इति उद्धृतम्। 'साङ्गमेतन्निरङ्गं तु शुद्धं माला तु पूर्ववत्' इत्यत्र 'पूर्ववत्' शब्देन मालोपमायाः निर्देशः कृतः, किन्तु मालोपमा तु वृत्यां निरुपितमस्ति, न कारिकायाम्। अतः कारिकाकारः वृत्तिकारः मम्मटाचार्य एव इति स्पष्टं भवति। हेमचन्द्राचार्य अपि काव्यानुशासने कारिकाकाररूपेण मम्मटस्य उल्लेखं करोति। **'यथाह मम्मटः अगूढमपरस्याङ्गम्'**। काव्यप्रकाशस्य प्राचीनटीकाकाराः जयन्तभट्टसरस्वतीतीर्थ-सोमेश्वर-प्रदीपकार-इत्यादीनां मतानुसारं ग्रन्थकारः मम्मटः। एतैः प्रमाणैः वृत्तिकारिकयोः एककर्तृत्वं सिद्ध्यति।

॥ अथ सप्तममोल्लासः ॥

काव्यलक्षणे निहितम् 'अदौषौ' इति पदस्य विवेचनात् पूर्वं दोषाणां स्वरूपं स्पष्टं भवति । अतः श्रीमम्मटाचार्यः सप्तमोल्लासस्य प्रारम्भं दोषसामान्यलक्षणेन करोति।

दोषसामान्यलक्षणं तथा च काव्यदोषस्वरूपम्

मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः॥

''मुख्यार्थहतिः दोषः'' इत्यत्र 'हतिः' इत्युक्ते 'अपकर्षः'। 'मुख्यार्थ' इत्युक्ते 'रसः'। - मुख्यस्यार्थस्य हतिरपकर्षो यस्मात् स दोष इत्यर्थः। एवं च 'मुख्यार्थापकर्षकत्वं दोषत्वम् इति दोषसामान्यलक्षणम्। किन्तु ''रसश्च मुख्यः''। अतः रसस्य अपकर्षकाः दोषाः। अत्र रसशब्देन भावरसाभासभावाभासादीनां ग्रहणं भवति। अतः रसभावादीनाम् अपकर्षकाः दोषाः। **(रसदोषाः)** 'तदाश्रयाद् वाच्यः' अर्थात् तेन रसेन आश्रयकारणात् उपकारकतया वाच्यः शब्दबोध्यः। वाच्यलक्ष्यव्यङ्ग्यरूप इत्यर्थः। काव्ये यत्र रसप्राधान्यं न भवति तत्र वाच्यलक्ष्यव्यङ्ग्यार्थेन चमत्कृतिः भवति। अतः वाच्याद्यर्थाः मुख्याः। रसोपकारकवाच्यादीनाम् अर्थानाम् अपकर्षकाः दोषा। **(अर्थदोषाः)** शब्दाद्या हि उभयोः रसवाच्ययोः उपयोगिनः भवन्ति। 'शब्दाद्या' इत्यत्र आद्यपदेन वर्णरचनयोः ग्रहणं भवति। अतः शब्दादीनाम् (वाक्य-पद-वर्ण-रचनादीनां) **अपकर्षकाः दोषाः। (शब्ददोषाः)** -

(पददोषाः, पदांशदोषाः, वाक्यदोषाः च) संक्षेपेण मुख्यार्थस्य अपकर्षकाः दोषा अर्थात् १, साक्षात् रसभावादीनाम् अपकर्षकाः दोषाः। २, रसोपकारकवाच्यलक्ष्यव्यङ्ग्यार्थानाम् अपकर्षकाः दोषाः। ३, रसवाच्ययोः उपकारकपदवाक्यवर्णरचनादीनाम् (शब्दादीनाम्) अपकर्षकाः दोषाः। आहत्य दोषाणां पञ्च प्रकाराः भवन्ति। १, पददोषाः २, पदांशदोषाः ३, वाक्यदोषाः ४, अर्थदोषाः ५, रसदोषाः

प्राचीनकालात् आलङ्कारिकाः काव्यदोषाणां विवेचनं कुर्वन्तः आसन् । कवयः काव्यदोषात् परिचिताः भवेयुः तथा च काव्ये दोषाणां परित्यागः भवेत् इति आशय आसीत्। 'सौकर्याय प्रपञ्चः' (काव्यलङ्कारसूत्र-२,१, ३)। सर्वप्रथमम् आचार्य-वामनेन दोषाणां सामन्यलक्षणं कृतम् यत्- गुणविपर्ययात्मानो दोषाः (२, १, १) ध्वन्यालोके आनन्दवर्धनेनापि उक्तम् यत्-''द्विविधो हि दोषः कवेरव्युत्पत्तिकृतः अशक्तिकृतश्च। **तत्राव्युत्पत्तिकृतो दोषः** शक्तितिरस्कृतत्वादेव कदाचिन्न लक्ष्यते। यस्त्वशक्तिकृतो दोषः सः झटिति प्रतीयते'' -(ध्वन्यालोकः, कारिका-३,६) श्रीमम्मटाचार्यस्य दोषलक्षणं व्यापकम्। साहित्यदर्पणकारः तथा च हेमचन्द्राचार्योऽपि श्रीमम्मटस्य अनुसरणं करोति। - 'रसापकर्षकाः दोषाः' (साहित्यदर्पणः ७/१) - 'रसस्योत्कर्षापकर्षहेतू गुणदोषौ, भक्त्या शब्दार्थयोः'। (काव्यानुशासनम् १/१२)

पददोषाः-

दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम्।
निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाऽश्लीलम्॥
सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम्।
अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव॥

१, श्रुतिकटुत्वम् २, च्युतसंस्कृतित्वम् ३, अप्रयुक्तत्वम् ४, असमर्थत्वम् ५, निहतार्थत्वम् ६, अनुचितार्थत्वम् ७, निरर्थकत्वम् ८, अवाचकत्वम् ९, त्रिधाऽश्लीलत्वम् १०, सन्दिग्धत्वम् ११, अप्रतीतत्वम् १२, ग्राम्यत्वम् १३, नेयार्थत्वम् १४, क्लिष्टत्वम १५, अविमृष्टविधेयांशत्वम् १६, विरुद्धमतिकृत्त्वम्

१. श्रुतिकटुत्वम्

परुषवर्णतया येन पदेन रसस्य अपकर्षः भवति सः श्रुतिकटुदोषः। श्रुतिकटुः शृङ्गारे दोषत्वं किन्तु रौद्रे गुणत्वं प्राप्नोति। अत अनित्यदोषः। यथा-

अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः।
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा॥

अत्र 'कार्तार्थ्यम्' इति पदं परुषवर्णयुक्तम् अतः श्रुतिकटुत्वम्।

२. **च्युतसंस्कृतित्वम् -**

व्याकरणसंस्कारविहीन पदेन च्युतसंस्कृतिदोषः भवति। च्युतसंस्कृतित्वं व्याकरणलक्षणहीनम्।

एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डर-
प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते।
तत् पल्लीपतिपुत्रि! कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनुनाथत कुचयुगं पत्रावृतं मा कृथाः।

अत्र 'त्वामनुनाथते' इत्यत्र व्याकरणदृष्ट्या अशुद्धिः। 'आशिषि नाथः' इति सूत्रेण 'आशिस्' इति अर्थे 'नाथृ' धातोः आत्मनेपदी प्रयोगः क्रियते। (क्रीडोऽनुसंपरिभ्यश्च - १/३/२१ पा. सू.) अत्र आत्मनेपदी प्रयोगः कृतः अतः दोषः।

३. **अप्रयुक्तत्वम् -**

कोशादिव्याकरणसम्मते सति कविभिः निषिद्धं वा उपेक्षितं पदं दुष्टम्। यथा-

यथाऽयं दारुणाचारः सर्वदैव विभाव्यते।
तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा॥

एतस्मिन् उदाहरणे 'दैवत' शब्दो (दैवतानि पुंसि वा इति) पुल्लिङ्गे सन् अपि न केनचित् प्रयुज्यते। अतः अप्रयुक्तप्रयोगेण मुख्यार्थप्रतीतिः विलम्बेन भवति। तेन दोषत्वं याति।

४. **असमर्थत्वम्** - यत्तदर्थं पठ्यते न तत्रास्य शक्तिः असमर्थम्। यथा-

तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः।
सुरस्रोतस्विनीमेष हन्ति सम्प्रति सादरम्॥

अत्र 'हन्ति' इति दुष्टं पदम्। यद्यपि 'हन् हिंसागत्योः' इति धातुपाठे 'हन्' इति धातुः केनापि सहयोगेन गमनार्थकः (पादाभ्यां हन्यते गम्यते इति पद्धतिः मार्गः) किन्तु अत्र 'हन्ति' गमनार्थे न समर्थः। तेन मुख्यार्थबोधो विलम्बेन; अतः रसस्यापकर्षः।

५. निहतार्थत्वम् -

अर्थद्वययुक्तपदस्य अप्रसिद्धार्थे प्रयोगः भवति तदा निहतार्थदोषः। यथा-

यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन।
मुग्धा साध्वसतरला विलोक्य परिचुम्बिता सहसा॥

अत्र 'शोणित' इति दृष्टं पदम्। शोणितं रुधिरार्थे प्रसिद्धम् किन्तु अत्र इषद्रक्तार्थे प्रयुक्तम् अतः न विवक्षितम्। तेन निहतार्थत्वम्।

६. अनुचितार्थत्वम् -

अनुचितार्थे प्रयुक्तं दुष्टं पदम्। यः शब्दः विविक्षितार्थस्य तिरस्कारं कृत्वा कस्यचिदर्थस्य व्यञ्जकः भवति सः अनुचितार्थदोषः। यथा-

तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या।
प्रयान्ति तामाशुगतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः॥

अत्र 'पशुता' इति पदं भीरुतामभिव्यनक्तीत्यनुचितार्थम्।

७. निरर्थकत्वम् - निरर्थकं पादपूरणमात्रप्रयोजनं चादिपदम्। यथा-

उत्फुल्लकमलकेसरपरागगौरद्युते ! मम हि गौरी !।
अभिवाञ्छितं प्रसिद्ध्यतु भगवति ! युष्मत्प्रसादेन॥

अत्र हि शब्दः निरर्थकः।

८. अवाचकत्वम् - कविविवक्षितार्थस्य वाचकः न सः अवाचकः। यथा-

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः॥

अत्र जन्तुपदम् अदाता इति अर्थे विवक्षितम्। किन्तु तस्य वाचकं न अतः अवाचकत्वम्।

९. त्रिधाऽश्लीलत्वम् - अश्लीलस्य त्रयः भेदाः व्रीडा जुगुप्सा अमङ्गलश्च। व्रीडा यथा-

साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते।
तस्य धीशालिनः कोऽन्यः सहेतारालितां भ्रुवम्॥

अत्र 'साधनं' पुरुषेन्द्रियवाचकः। जगुप्सा यथा - **'लीलातामस्साहतः ----०'** अत्र वायुशब्देन अपानवायोः स्मरणं भवति। अतः सः जुगुप्साव्यञ्जकः। अमङ्गलं यथा - **'मृदुपवनविभिन्नो----०'** इत्यत्र विनाशशब्देन मृत्योः प्रतीतिः।

१०. **सन्दिग्धत्वम्** - येन पदेन अर्थद्वयबोधत्वेन संदेहोत्पत्तिः भवति, सः सन्दिग्धः दोषः। यथा

आलिङ्गितस्तत्रभवान् सम्पराये जयश्रिया।
आशीः परम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु॥

अत्र वन्द्यां कि हठहृतमहिलायां किं वा नमस्यामीति सन्देहः।

११. **अप्रतीतत्वम्** - अप्रतीतं यत्केवले शास्त्रे प्रसिद्धम्। यथा-

सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः।
विधायमानमप्येतन्न भवेत्कर्म बन्धनम्॥

अत्राशयशब्दः वासनापर्यायिः केवले योगशास्त्रे प्रसिद्धः। अतः अप्रतीत्वं दोषः।

१२. **ग्राम्यत्वम्** - ग्राम्यं यत्केवले लोके स्थितम्। यथा

राकाविभावरीकान्तसंक्रान्तद्युति ते मुखम्।
तपनीयशिलाशोभा कटिश्च हरते मनः॥

अत्र कटिशब्दः संस्कृतसमाजे अप्रसिद्धः अतः ग्राम्यत्वम्।

१३. **नेयार्थत्वम्** - यन्निषिद्धं (रूढिप्रयोजनशून्यं) लाक्षणिकं नेयार्थत्वम्। यथा

शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियम्।
करोति ते मुखं तन्वि चपेटापातनातिथिम्॥

अत्र चपेटापातनेन निर्जितत्वं (पराजयः) लक्ष्यते। किन्तु प्रयोजनाभावेन नेयार्थत्वम्।

श्रुतिकटु-इत्यादिदोषाः पदगताः समासगताः च।

१४. **क्लिष्टत्वम्** - विवक्षितार्थः विलम्बेन प्रतीयते सः क्लिष्टदोषः। यथा -

अत्रिलोचनमसम्भूतज्योतिरुद्गमभासिभिः।
सदृशं शोभतेऽत्यर्थं भूपाल ! तव चेष्टितम्॥

अत्राऽत्रिलोचनसम्भूतस्य चन्द्रस्य ज्योतिरुद्गमेन भासिभिः कुमुदैरित्यर्थः। अतः समस्तपदं क्लिष्टम्।

१५. **अविमृष्टविधेयांशत्वम्** - यत्र विधेयांशः प्राधान्येनानिर्दिष्टो भवति तत्र अविभृष्टविधेयांशदोषः। यथा-**'मूर्ध्नामुदवृतकृता---०'** इत्यत्र 'मिथ्यामहित्वं' विधेयांशः। तस्य प्राधान्येन निर्दिषः न कृत अतः दोषः।

१६. **विरुद्धमतिकृतत्वम्** - येन पदेन विवक्षितार्थप्रतिबन्धकान्यार्थे वृद्धिः भवति तेन विरुद्धमतिकृतत्वम्। यथा-

सुधाकरकराकारविशारद विचेष्टितः।
अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे॥

अत्र कार्यस्य प्रयोजनस्याभावोऽकार्यम्। अकार्य - मित्रम् अकार्यमित्रम्। अत्र कार्यं विना मित्रम् इति विवक्षितम्, अकार्ये मित्रमिति तु प्रतीतिः।

वाक्यदोषाः -

उपरोक्तेषु श्रुतिकट्वादिषुः १६ दोषेषु च्युतसंस्कृत्यसमर्थ-निरर्थकैः विना अवशिष्टाः त्रयोदश (१३) दोषाः वाक्येऽपि भवन्ति। १५ दोषेषु केचन पदांशगताः पदैकदेशगताः वा भवन्ति।

अपास्य च्युतसंस्कामसमर्थं निरर्थकम्।
वाक्येऽपि दोषाः सन्त्येते पदस्यांशेऽपि केचन॥

पददोषाणां वाक्यदोषाणां च गंभीरतया विवेचनं काव्यप्रकाशस्य टीकासु कृतमस्ति। संक्षेपेण यदि वदामः तर्हि 'एकपदवृत्ति श्रुतिकट्वादयः पददोषाः' तथा च 'अनेकपदवृत्ति श्रुतिकट्वादयः वाक्यदोषाः' वाक्यगतदोषा एवम्- १, वाक्यगतश्रुतिकटुः २, वाक्यगतोऽप्रयुक्तः ३, वाक्यगतनिहतार्थः ४, वाक्यगतोऽनुचितार्थः ५, वाक्यगतोऽवाचकः ६, वाक्यगत-व्रीडाव्यञ्जकोऽश्लीलः ७, वाक्यगत-सन्दिग्धः वाक्यगतजुगुप्साश्लीलः, वाक्यगतोऽमङ्गलाश्लीलः ८, वाक्यगतोऽप्रतीतः ९, वाक्यगतग्राम्यः १०, वाक्यगतनेयार्थः ११,वाक्यगत-क्लिष्टता १२, वाक्यगतोऽविमृष्टविधेयांशः १३, वाक्यगतविरुद्धमतिकृत्

पदांशदोषाः - १, पदैकदेशश्रुतिकटुः २, पदैकदेशनिहतार्थः ३, पदैकदेशनिरर्थकः ४, पदैकदेशोऽवाचकः ५, पदैकदेशव्रीडावाचकाश्लीलः ६, पदैकदेशोऽसन्दिग्धः पदैकदेश-जुगुप्सावाचकाश्लीलः ७, पदैकदेश-नेयार्थः पदैकदेश-अमङ्गलवाचकाश्लीलः

केवलवाक्यगतदोषाः - १, प्रतिकूलवर्णः २, उपहितविसर्गः ३, लुप्तविसर्गः ४, विसन्धिः ५, हतवृत्तः ६, न्यूनपदम् ७, अधिकपदम् ८, कथितपदम् ९, पतत्प्रकर्षः १०, समाप्तपुनरात्तम् ११, अर्धान्तरैकवाचकः १२, अभवन्मतयोगः १३, अनभिहितवाच्यः १४,अपदस्थपदम् १५, अपदस्थसमासः १६, अभिहितावाच्यः १७, गर्भितः १८, अप्रसिद्धिहतः १९, भग्नप्रक्रमः २०, अक्रमः २१, अमतपरार्थः प्रतिकूलवर्णमादयः वाक्ये एव रसादीनाम् अपकर्षकाः भवन्ति अतः वाक्यदोषा एव। साहित्यदर्पणकारेण

वाक्यदोषाणां संख्या २३ दर्शिता अस्ति। मुख्यवाक्यदोषाणां विवेचनम् यथा-

(१) प्रतिकूलवर्णता - यत्र वर्णाः प्रकृतरसपोषकाः न भवन्ति तत्र प्रतिकूलवर्णतादोषः। यथा शृङ्गाररसे - ''अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि माम्'' इत्यत्र 'शृट' वर्गस्य प्रयोगः कृतः किन्तु टवर्गस्य वर्णाः शृङ्गाररसस्य परिपन्थिनः अतः दोषः।

(२) न्यूनपदता - यत्र पदानां न्यूनता भवति तत्र न्यूनपदतानामकः वाक्यदोषः। यथा-

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु॥

श्लोकेऽस्मिन् प्रथमत्रिषु चरणेषु 'अस्माभिः' इति कर्तृपदं न्यूनम्। तथैव चतुर्थचरणे 'इत्थम्' इति न्यूनम्। पदैः विना वाक्यस्य पूर्णान्वयः न भवति, अतः न्यूनपदत्वं दोषः।

(३) अधिकपदत्वम् - अभीष्टात् अर्थात् अधिकानि पदानि यत्र भवन्ति तत्र अधिकपदत्व दोषः भवति।

स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसंक्रान्तनिशातशास्त्रतत्त्वः।
अविरुद्धसमन्वितोक्तियुक्तः प्रतिमल्लास्तमयोदयः स कोऽपि॥

अत्राऽऽकृतिशब्दः अधिकः।

(४) कथितपदम् - मुहुर्मुहुः एकस्य पदस्य प्रयोगेण एष दोषः भवति। एषः दोषः कवेः शब्ददारिद्र्यं प्रकटयति।

अधिकरतलतल्प कल्पितस्वापलीला-
परिमिलन निमीलत्पाण्डिमा गण्डपाली।
सुतनु ! कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीला यौवराज्याभिषेकम्॥

अत्र 'लीला' इति पदस्य पौनःपुन्येन प्रयोगः।

(५) अभवन्मतः (इष्टः) योगः - यदा पदानां परस्परान्वयः भवितुं न शक्नोति तदा अभवन्मतयोगः दोषः। अर्थात् वाक्ये पदानां इष्टसम्बन्धः न विद्यते। ''गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्'' अत्र अप्रधानं प्रधानस्य कृते, प्रधानद्वयस्य वा अधिकानां परस्परसम्बन्धः न भवति। मीमांसकानाम् अनुसारेण वाक्ये प्रयुक्तानाम्

अवान्तरपदानां सम्बन्धः मुख्यवाक्यात् भवेत्। **"येषां तास्त्रिदशेभदानसरितः---०"** इत्यत्र 'यैः' इत्यस्य क्षपाचारिणा सह सम्बन्धः विवक्षितः किन्तु तत् न भवति यतः द्वे पदे अपि विभिन्नविभक्ते स्तः। विशेषणविशेष्ययोः विभक्तिः एका एव भवेत् किन्तु अत्र भिन्नतावशात् सम्बन्धः न युज्यते। अतः 'क्षपाचारिभिरिति' पाठे युज्यते समन्वयः।

अर्थदोषाः -

> **अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः ।**
> **सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ।।**
> **अनवीकृतः सनियमानियमविशेषा विशेषपरिकृताः।**
> **साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः।।**
> **विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः।**

१, अपुष्टत्वम् २, कष्टत्वम् ३, व्याहतत्वम् ४, पुनरुक्तत्वम् ५, दुष्क्रमत्वम् ६, ग्राम्यत्वम् ७, सन्दिग्धत्वम् ८, निर्हेतुत्वम् ९, प्रसिद्धिविरुद्धत्वम् १०, विद्याविरुद्धत्वम् ११, अनवीकृतत्वम् १२, नियमपरिवृत्तत्वम १३, अनियमपरिवृत्तत्वम् १४, विशेषपरिवृत्तत्वम् १५, अविशेषपरिवृत्तत्वम् १६, साकाङ्क्षत्वम् १७, अपदयुक्तत्वम् १८, सहचरभिन्नत्वम् १९, प्रकाशितविरुद्धत्वम् २०, विध्ययुक्तत्वम् २१, अनुवादयुक्तत्वम् २२, त्यक्तपुनःस्वीकृतत्वम् २३, अश्लीलत्वम् आहत्य २३ अर्थदोषाः। अन्यैः शब्दैरपि विवक्षितार्थः दोषयुक्तः भवति सः अर्थदोषः तद्भिन्नः (रसदोषभिन्नः) दोषः शब्ददोषः। प्रदीपकारः समर्थयति यत्-"यत्र विवक्षित एवार्थोऽन्यथाभिधानेऽपि दुष्यति सोऽर्थदोषः, अन्यस्तु रसदोषभिन्नः शब्ददोष इति विवेकः। **(१) अपुष्टत्वम्** - अपुष्टत्वं मुख्यानुपकारित्वम्। - **साहित्यदर्पणः** योऽर्थः विवक्षितार्थस्य उपकारकः न भवति सः अपुष्टः दोषः। **'अतिविततगगनसरणिप्रसरण---०'** इत्यत्र अतिविततत्वादीनाम् अर्थानां शब्दैः प्रतिपादनं यदि न कुर्मः तथापि अत्र बाधा न भवति यतः आकाशस्य अतिदीर्घत्वम् अग्नेः उष्णतावत् स्वतः सिद्धम्। अतः अपुर्घः दोषः। अत्र असङ्गतः वा पुनरुक्तः दोषः न। मम्मटाचार्यः स्पष्टीकरोति यत्-"अत्रातिविततत्वादयोऽनुपादानेऽपि प्रतिपाद्यमानमर्थं न बाधन्त इत्यपुष्टाः न त्वसङ्गताः पुनरुक्ता वा।" **(२) कष्टत्वम्-** यस्य प्रतीत्यां क्लेशः भवति सः कष्टत्वदोषः। **'सदा मध्ये---०'** इत्यत्र अर्थः दुरूहः। अत्र विवक्षितार्थः क्लेशपूर्णः प्रतीयते। **(३) व्याहतत्वम्** - कस्यापि निन्दां वा स्तुतिं कृत्वा तस्य विपरीतकथनम्। "उत्कर्षो वापकर्षो वा प्राग्यस्यैव

निगद्यते तस्यैव तदन्यश्चेद् व्याहतोऽर्थस्तदा भवेत्''। यथा -

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः॥

श्लोकेस्मिन् पूर्वार्धे चन्द्रकलादीनां माधवस्य दृष्ट्या अपकर्षः किन्तु उत्तरार्धे माधवस्य उत्कर्षं प्रकटीकर्तुं मालत्याः चन्द्रिकारूपेण वर्णनं कृतमस्ति। अतः अत्र व्याहत्वम् दोषः। (४) **पुनरुक्तत्वम्** - शब्देन प्रसिद्धार्थस्य पुनः समानैरर्थैः कथनं पुनरुक्तदोषः। सः द्विविधः १, पदार्थस्य पुनरुक्तिः २, वाक्यस्य पुनरुक्तिः यथा ''कृतमनुमतमि''त्यादि। अत्र अर्जुनरूपपदार्थस्य पुनरुक्तिः। 'अस्त्रज्वाला' इत्यत्र वाक्यार्थस्य पुनरुक्तिः। (५) **दुष्क्रमत्वम्** - अनुचितक्रमात् दुष्क्रमार्थः। दुष्टः अनुचितक्रमो यत्र। अनुचितक्रमः अर्थात् लोकशास्त्रविरुद्धक्रमः। यथा 'भूपालरत्न' इत्यत्र 'तुरङ्गं मातङ्गं वा' इति लोकविरुद्धक्रमः। (६) **ग्राम्यत्वम्** - अशिष्टेषु लोकेषु प्रसिद्धः अर्थः ग्राम्यः।

स ग्राम्योऽर्थो रिरंसादि पामरैर्यत्र कथ्यते।
वैदग्ध्यवक्रिमबलं हित्वैव वनितादिषु॥

तेन सहृदयानां हृदये अरुचिः जायते। (७) **सन्दिग्धत्वम्** - 'सन्दिग्ध' इत्युक्ते सन्देहस्य विषयः। अर्थात् प्रकरणादिज्ञानाभावे यत्र अर्थद्वयात् एकस्य निर्णयः न भवति तत्र सन्दिग्धार्थदोषः। 'मात्सर्य' इति पद्ये भूधरनितम्बसेवने तथा च कामिनीनितम्बसेवने सन्देहः। (८) **निर्हेतुत्वम्** - यत्र हेतोः कथनं न भवति तत्र 'निर्हेतुः' दोषः। यथा - 'गृहीतं येनासीः परिभवभयान्नोचितमपि।' अत्र शस्त्रविमोचने हेतुर्नोपात्तः। अश्वत्थाम्नः शस्त्रत्यागे पितृशोकस्य हेतुः नोक्तसाः। (९) **प्रसिद्धविरुद्धत्वम्** - प्रसिद्धितः विरुद्धः य अर्थः सः प्रसिद्धविरुद्धः। सः द्विविधः लोकप्रसिद्धिविरुद्धः कविप्रसिद्धिविरुद्धः। '**इदं ते---०**' इति लोकप्रसिद्धि-विरुद्धस्योदाहरणम्। लोके विष्णोः चक्रं प्रसिद्धम्। '**उपपरिसारं---०**' इति कविप्रसिद्धिविरुद्धस्योदाहरणम्। (१०) **विद्याविरुद्धत्वम्** - विद्याविरुद्धः इत्युक्ते शास्त्रविरुद्धः। धर्मार्थ-योगशास्त्रादीनां विरुद्ध अर्थः विद्याविरुद्धः। यथा -

सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च॥

अत्र गृहोपरागादिकं विना रात्रौ स्नानं धर्मशास्त्रात् विरुद्धम्। तथैव **'अनन्यसदृशम्---०'** इत्यत्र अर्थशास्त्रविरुद्धम्।

(११) अवनीकृतत्वम् - यस्य भङ्गिम्ना निर्देशः न भवति तत्र अनवीकृत्वम्। अर्थात् प्रकारान्तरेण कथनं कृत्वा यत्र नवीनताया उत्पादनं न क्रियते तत्र कवेः अशक्तिः दृश्यते। तेन सहृदयानां मनसि उद्विग्नता जायते। यथा - **'प्राप्ताः श्रियः---०'** इत्यत्र ततः किमिति न नवीकृतम्। किन्तु **'यदि दहति---०'** इत्यत्र आश्चर्यरूपम् एकं भावं 'किमद्भुतम्', 'किं ततः', 'प्रकृतिरेवम्' इति भङ्गीभेदेन उक्तम्। **(१२) सनियमपरिवृत्तत्वम् -** यः नियमपूर्वकं वक्तव्यः तम् अर्थम् अनियमपूर्वकं वदामः तदा सनियमपरिवृत्तत्वं: दोषः। यथा **'यत्रानुल्लिखितार्थमेव निखिलं---०'** एतस्मिन् उदाहरणे 'छायामात्रेण मणीकृतेषु' इति वक्तव्येन चिन्तामणेः अपेक्षया अपकृष्टेषु मणिषु चिन्तामणेः गणनाया उपालम्भः भवति। किन्तु अत्र अनियमेन उक्तमस्ति। तेन विवक्षितार्थस्य बोधः न भवति। **(१३) अनियमपरिवृत्तत्वम् -** नियमपूर्वकं कथनम् अयोग्यं तथापि नियमपूर्वकं कथनं भवति तत्र अनियमपरिवृत्तः अर्थः। **'वक्त्राम्भोजे सरस्वत्यधिवसति---०'** इत्यत्र 'शोण एव' इति नियमः अनुचितः - अपरिवृत्तः। यतः पिपासायाः अनौचित्यविशेषस्य प्रतीतिरेव कवेः अभिप्रायः, 'केवलं शोण एव'' शोण ही' इति वक्तव्येन अन्येषां जलाशयानां व्यावृत्तिः भवति। तत् अनौचित्यातिशयतायां सहायकः न, अपि तु बाधकः। **(१४) विशेषपरिवृत्तत्वम् -** विशेषकथनयोग्यम् अर्थं सामान्यरूपेण वदामः तदा विशेषपरिवृत्तार्थः भवति। यथा - **'श्यामां श्यामलिमानमानयत---०'** इत्यत्र 'विशेषरात्री' इति वक्तव्या आसीत् किन्तु सामान्यरूपेण श्यामेति उक्तम्। **(१५) अविशेषपरिवृत्तत्वम् -** सामान्यरूपेण यस्य कथनं योग्यम् आसीत् तस्य विशेषरूपेण कथनं भवति तदा अविशेषपरिवृत्तार्थः। यथा- **'कल्लोलवेल्लितदृषत्परुषप्रहारैः--०'** अत्र 'ऐकेन किं न विहितो भवतः स नाम' इति सामान्यं वाच्यम्। **(१६) साकाङ्क्षत्वम् - यत्र अगृहीतार्थस्य आकाङ्क्षा भवति तत्र साकाङ्क्षः** अर्थः यथा- **'अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः---०'** अत्र 'स्त्रीरत्नम्' इति शब्दः 'उपेक्षितुम्' इति अर्थस्य आकाङ्क्षां करोति। अन्यथा 'कथमृष्यते' इति पदेन सह अन्वयः कथं संभवति। स्त्रीरत्ने दोषः न अपि तु तस्य उपेक्षायां दोषः। **(१७) अपदयुक्तत्वम् -** प्राकृतार्थात् विरुद्धार्थपदैः सह सम्बद्धः अर्थः अपदयुक्तार्थः। (अपदे अस्थाने युक्तः) यथा- **'आज्ञा शक्रशिखामणिप्रणयिनी---०'** अत्र रावणस्य उपेक्षा विवक्षिता अस्ति। सा उपेक्षा 'स्याच्चेदेष न रावणः' इत्यनेन प्रकटीभवति। तदनन्तरं 'क्व नु पुनः'

इत्यादयः रावणस्य उपेक्षाभावं शिथिलं कुर्वन्ति। अतः विवक्षितार्थस्य विरुद्धः। (१८)

सहचरभिन्नत्वम् - उत्कृष्टैः पदार्थैः सह निकृष्टपदार्थानां निरूपणं भवति तदा सहचरभिन्नः दोषः। यथा

श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा।
निशाः शशाङ्केन धृतिः समाधिना नयेन चालङ्क्रियते नरेन्द्रता॥

अत्र श्रुतादिभिः उत्कृष्टैः सह व्यसनमूर्खतयोः निकृष्टयोः भिन्नत्वम् अस्ति। (१९)

प्रकाशितविरुद्धत्वम् - प्रकाशितः व्यक्तः प्रतिकूलः अर्थः येन। अर्थात् यत्र व्यञ्जनाद्वारा विवक्षितार्थस्य विरोधिनः बोधः भवति तत्र प्रकाशितविरुद्धार्थः। सहचरभिन्ने तु पदार्थः भिन्नार्थबोधकः किन्तु प्रकाशितविरुद्धे वाक्यार्थः विरुद्धार्थव्यञ्जकः भवति। **'लग्नं रागावृताङ्ग्या---०'** इति पद्ये राजस्तुतिः विवक्षिता। किन्तु 'विदितं तेऽस्तु' इति वाक्यार्थः व्यञ्जनाद्वारा प्रतीयते यत्- श्रीस्तस्मादपसरतीति विरुद्धं प्रकाश्यते। (२०)

विध्ययुक्तत्वम् - विध्ययुक्त इत्युक्ते अयुक्तविधिः। अज्ञातपदार्थज्ञापनं विधिः। विधेः अयुक्तता अर्थात् (१) अविधेयस्य विधेयरूपेणकथनम् (२) विधेः विपरिक्रमात् कथनम्। प्रथमस्य उदाहरणम् - 'प्रयत्नपरिबोधितः'। अत्र 'शयितः प्रयत्नेन बोध्यसे' - इति विधेयम्। 'प्रयत्नप्रतिबोधनम्' इति विवक्षितम् अतः न 'शेषे' विधेयम्। (२१)

अनुवादायुक्तत्वम् - सिद्धवस्तुनः कथनम् अनुवादः। विधेयप्रतिकूलोद्देश्यस्य कथनम् एव अनुवादायुक्तः। यथा - 'अरे रामाहस्ताभरण---०' अत्र 'विरहिप्राणदमन' इति नानुवाद्यम्। (२२) **त्यक्तपुनःस्वीकृतत्वम्** - (१) क्रियाकारकयोरन्वयात् पूर्णनिराकाङ्क्षवाक्यार्थं समाप्य द्वितीयकारकादीनां ग्रहणं यत्र क्रियते तत्र त्यक्तपुनःस्वीकृतः। (२) यत्र समाप्तवाक्यार्थे अपरविशेषणस्य ग्रहणं भवति तत्र 'समाप्तपुनरात्तदोषः। किन्तु यत्र द्वितीयः वाक्यार्थः पुनः स्वीक्रियते तत्र त्यक्तपुनःस्वीकृतदोषः। (२३) **अश्लीलत्वम्** - यत्र एकेनार्थेन सह द्वितीयस्य अश्लीलार्थस्य बोधो भवति तत्र अश्लीलदोषः। यथा

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः।
यथास्य जायते पातो न तथा पुनरुन्नतिः॥

अत्र पुंव्यञ्जनस्यापि प्रतीतिः।

अर्थदोषाणाम् अपवादाः।

दोषाणां यत् विवेचनं कृतम्। तत्र क्वचित् विषयविशेषतया अदोषाः भवन्ति।

केषाञ्चन अर्थदोषाणां अनित्यता-विषये इदानीं मम्मटेन चर्चा कृता।

कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः।

सन्निधानादिबोधार्थं स्थितेष्वेतत्समर्थनम्।।

"अवसंतादीनि कर्णाद्याभरणान्येवोच्यन्ते, तत्र कर्णादिशब्दाः कर्णादिस्थितिप्रतिपत्तये।" अर्थात् अवतंसः कर्णभिरणार्थे प्रसिद्धः यदा काव्ये तस्य प्रयोगः भवति तदा पुनरुक्तिः भवति। किन्तु कुत्रचित् कर्णावतंसादिशब्दैराभूषणानां कर्णादौ विद्यमानता विवक्षिता। अतः न पुनरुक्तदोषः। यथा

अस्याः कर्णावतंसेन जितं सर्वं विभूषणम्।

तथैव शोभतेऽत्यर्थमस्याः श्रवणकुण्डल्।।

अपूर्वमधुरामोदप्रमोदितदिशस्ततः।

आययुर्भृङ्गमुखराः शिरः शेखरशालिनः।।

अत्र कर्ण-श्रवण-शिरशब्दाः सन्निधानप्रतीत्यर्थाः। 'विदीर्णा' उदाहरणे 'धनुः' इति शब्दस्य प्रयोगः आरूढत्वावगतये। अतः न पुनरुक्तदोषः। ज्याशब्दः रज्जूवाचकः। -(मौर्वीज्या शिञ्जिनीगुणः - अमरकोशः) काव्यालङ्कारसूत्रे वामनाचार्य एतस्मिन् प्रसङ्गे उक्तवान् - 'विशेषणस्य विशेषप्रतिपत्त्यर्थम् उक्तार्थस्य पदस्य प्रयोगः'। आचार्यमम्मटानुसारम् एतादृशेषु स्थानेषु क्रियाविशेषणेन एव विवक्षितार्थस्य अन्वयः शक्नोति। यथा - न खलु कर्णावतंसादिवज्ञघन काञ्चीत्यादि क्रियते। जगाद मधुरां वाचं विशदाक्षरषालिनीम्। अतः वामनस्य 'गतार्थस्यापि विशेषस्य विशेषणदानार्थं क्वचित्प्रयोगः कार्यः' इति न युक्तम्। **ख्यातेऽर्थे निर्हेतोरदुष्टता। -** यत्र हेतुः प्रसिद्धः भवति तत्र निर्हेतुकथनं तु निर्दोषयुक्तम्। यथा -

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम्।

उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः।।

अत्र रात्रौ पद्मस्य संकोचः, दिवा चन्द्रमसश्च निष्प्रभत्वं लोकप्रसिद्धिमिति 'न भुङ्क्ते' इति हेतुं नापेक्षते। अतः अत्र निर्हेतुत्वं दोषः नास्ति। **अनुकरणे तु सर्वेषाम् -** अर्थात् अनुरकणे सर्वत्र सर्वथा दोषः न भवति। यथा-

मृगचक्षुषमद्राक्षमित्यादि कथयत्ययम्।

पश्यैष च गवित्याह सूत्रामाणं यजेति च।।

अत्र 'अद्राक्षम्' इत्यत्र श्रुतिकटुः, 'गो इति' इत्यत्र च्युतिसंस्कृतिदोषः, 'सूत्रामाणम्' इत्यत्र च पुनरुक्तदोषः। किन्तु ऐते अनुकरणवशात् न तु दोषाः। यद्यनुकार्यदोषयुक्तं भवति तथापि अनुकरणं दोषयुक्तं न। **वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचित्क्वचिन्नौभौ**॥ वक्तृ-प्रतिपाद्य-व्यङ्ग्य-वाच्य-प्रकरणादीनां महिम्ना दोषोऽपि क्वचिद्गुणः क्वचिन्न दोषो न गुणः। यथा-

दीधीवेवीसमः कश्चिद्गुणवृद्ध्योरभाजनम्।

क्विप्प्रत्ययनिभः कश्चिद्यत्र सन्निहिते न ते॥

एतस्मिन् उदाहरणे वक्ता कश्चन वैयाकरणः। अत्र कस्यचित् ग्रामस्य पुरुषाणां वर्णनमस्ति। यथा 'दीधी' 'वेवी' च धातौ गुणवृद्धयः अभावः तथा ग्रामस्य केषुचित् पुरुषेषु अपि गुणवृद्ध्योः अभावः भवति। केचन पुरुषाः क्विप्प्रत्ययवत् नष्टभ्रष्टाः समृद्धिच्युताः च। अत्र विलम्बेन अर्थप्रतीतिः तथापि वक्तुः व्याकरणसम्बन्ध-प्रतीतिवशात् कष्टत्वदोषः न अपि तु गुणः। तथैव प्रतिपाद्यवशात् व्यङ्ग्यवशात् वाच्यवशात् च दोषाः गुणायन्ते।

रसदोषाः -

रसदोषाः काव्यस्य मुख्यदोषाः। रसोन्मीलनप्रक्रियायां काव्यशास्त्राचार्यैः ये नियमाः प्रदत्ताः तेषाम् अनुपालनेन काव्यं सरसं सुन्दरं सहृदयावर्जकं च भवति। किन्तु नियमानाम् उल्लङ्घनेन काव्यं दुष्टम् उपहासास्पदं च भवति। अतः एतेषां नियमानां अनुशीलनम् अपेक्षते। मम्मटाचार्यानुसारं त्रयोदश रसदोषाः।

व्यभिचारिरसस्थायिभावानां शब्दवाच्यता।

कष्टकल्पनया व्यक्तिरनुभावविभावयोः॥

प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।

अकाण्डे प्रथनच्छेदौ अङ्गस्याप्यतिविस्तृतिः॥

अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः।

अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः॥

(१) व्याभिचारिणां शब्दवाच्यता -यथा

सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे

सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनी।

सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे

पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायाऽस्तु वः ।।

अत्र व्रीडा, करुणा, त्रास इत्यादि व्यभिचारिभावाः। तेषाम् अभिधया प्रकाशनं न भवति। अतः स्वशब्दवाच्यतादोषः।

(२) रसानां शब्दवाच्यता :-

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम्।

नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः ।।

अत्र रसशब्देन स्ववाच्यता। रसस्य स्वशब्देन शृङ्गारादिशब्देन वा वाच्यत्वम्।

(३) स्थायिभावानां शब्दवाच्यता - यथा

सम्प्रहारे प्रहरणैः प्रहराणां परस्परम्।

ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत्।।

अत्र उत्साहस्य स्वशब्देन वाच्यता, अतः दोषः। (४) अनुभावानां कष्टकल्पनया व्यक्तिः - यथा

कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः।

लीलाशिरोंऽशुक निवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौ सा।।

एतस्मिन् उदाहरणे नायिकानिष्ठस्य अनुभावस्य उल्लेखः न, विभावेनापि अनुभावस्य अविलम्बेन प्रतीतिः। अतोऽत्र कष्टकल्पनया अनुभावस्य व्यक्तिः। (५) विभावानां कष्टकल्पनया व्यक्तिः यथा-

परिहरति रतिं मतिं लुनीते स्खलति भृशं परिवर्तते च भूयः।

इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः।।

अत्र वर्णिताः अनुभावाः न केवलं शृङ्गारे अपि तु करुणे बीभत्से भयानके च भवन्ति। अतः कामिनीरूपो विभावः अत्र कष्टकल्पनया प्रतीयते। तेन दोषः। (६) प्रतिकूलविभावादिग्रहः - यथा

प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं

प्रिये ! शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः।

निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं

न मुग्धे ! प्रत्येतु प्रभवति गतः कालहरिणः।।

अत्र प्रकृतरसः शृङ्गारः किन्तु तस्य विरुद्धस्य शन्तस्य विभावादीनां ग्रहणं कृतम् अतः दोषः। **'निभृतरमणे---०'** इत्यत्र प्रकृतरसः शृङ्गारः किन्तु तस्य विरुद्धस्य शान्तस्य अनुभावानां ग्रहणं कृतम्। (७) रसस्य दीप्तिः पुनः पुनः - यथा कुमारसम्भवे रतिविलापे करुणरसस्य पुनः पुनः दीप्तिः। (८) अकाण्डे प्रथनं-यथा-वेणीसंहारे द्वितीयाङ्केऽनेकवीरक्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णनम्। (९) अकाण्डे छेदः -यथा - वीरचरिते द्वितीयाङ्के राघवभार्गवयोर्धाराधिरूढे वीररसे ''कङ्कणमोचनाय गच्छामि'' इति राघवस्य उक्तौ। (१०) अङ्गस्यातिविस्तृतिः - मुख्यरसस्य वर्णनं काव्ये उचितं वर्तते, किन्तु अङ्गस्य विस्तारः अनुचितः। यथा हयग्रीववधे हयग्रीवस्य। (११) अङ्गिनोऽननुसन्धानम् - अर्थात् प्रधानभूतनायकादीनां विस्मरणम्। यथा रत्नावल्यां चतुर्थाङ्के वाभ्रव्यागमने सागरिकायाः विस्मृतिः। (१२) प्रकृतीनां विपर्ययः - प्रकृतयः त्रिधा भवन्ति - दिव्या अदिव्या दिव्यादिव्याश्च। यथा इन्द्रादिः दिव्या, मनुष्यरूप-वत्सराजादिः अदिव्या तथा च मनुष्यरूपेणावतीर्णराजादिः दिव्यादिव्या। **एतेषां त्रयाणामपि चत्वारः भेदाः**। १. वीररसप्रधानधीरोदात्तः। २. रौद्ररसप्रधानः धीरोद्धतः। ३. शृङ्गाररसप्रधानः धीरललितः। ४. शान्तरसप्रधानः धीरप्रशान्तः। ते च उत्तमाधममध्यमाश्च। रतिहासशोकाद्भुतानि अदिव्योत्तमप्रकृतिवत् दिव्येषु अपि भवन्ति। किन्तु सम्भोगशृङ्गाररूपा रतिः उत्तमदेवता विषया न वर्णनीया। पित्रोः सम्भोगवर्णनमिव तत् अनुचितम्। यथा-

क्रोधं प्रभो ! संहर संहरेति यावद्गिरः खे मरुतां चरन्ति।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार।।

समुद्रोल्लङ्घनादीनाम् उत्साहस्य च वर्णनं दिव्येषु भवेत्। अदिव्येषु लोकप्रसिद्धमेव वर्णनीयम्। औचित्यात् अधिकं असत्यप्रतिभासेन 'नायकवद्वर्तितव्यं न प्रतिनायकवद्' इत्युपदेशः निरर्थकः भवेत्। दिव्यादिव्येषु उभयथाऽपि। (१३) अनङ्गस्याभिधानम् - अनङ्गम् अर्थात् रसाय अनुपकारिः तस्य वर्णनम्। यथा- कर्पूरमञ्जर्यां नायिकया स्वात्मना च कृतं वसन्तवर्णनमनादृत्य वन्दिवर्णितस्य राज्ञा प्रशंसनम्। ईदृशाः रसे दोषाः स्युः। मम्मटानुसारम् एते दोषाः अनौचित्याद् एव भवन्ति। अतः सः ध्वनिकारस्य वचनं स्वीकरोति यत् -

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा।।

रसदोषाणाम् अपवादाः

न दोषः स्वपदेनोक्तावपि संचारिणः क्वचित्। कदाचित् व्यभिचारिभावः स्वशब्दवाच्यः भवति तदापि न दोषः। यथा -

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः।
दृष्ट्वाऽग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः॥

अत्र 'औत्सुक्य' इति स्वशब्दोपादनदोषरूपः न; यतः तत्र आस्वादविधायकः न। औत्सुक्यस्य एकोऽपि तादृशः व्यभिचारिभावः नास्ति यत्सन्दिग्धरूपेण तस्य प्रतीतिं कारयेत्। त्वरादयः अनुभावा भयादीनामपि व्यञ्जकाः। 'दूरादुत्सुकम्' इति उदाहरणेन सिद्ध्यति यत् त्वरादयः अनुभावाः असन्दिग्धरूपेण व्यञ्जकाः न, अतः व्यभिचारिभावानां स्वशब्देन वाच्यता दोषः न। प्रतिकूलविभावादिग्रहणस्य अदोषता सञ्चार्यदिर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा।

अर्थात्- प्रकृतरसस्य विरुद्धरसस्य सञ्चार्चादेः (विभावानुभावव्यभिचारि-भावानाम्) बाध्यरूपेण रूपणं गुणरूपं भवति। बाध्यरूपेण विरुद्धरसस्य व्यभिचाराणां वर्णनं प्रकृतरसपरिपोषकृत्। यथा - '(क्वाकार्यम्' इत्यत्र प्रत्येकचरणस्य पूर्वभागे शान्तरसस्य व्यभिचारिवितर्कः व्यङ्ग्यः। उत्तरभागे शृङ्गारस्य व्यभिचारिमानः औत्सुक्यः व्यङ्ग्यः। औत्सुक्यादिभिः वितर्कादीनां बाध्यत्वम्। अत्र शृङ्गारस्य व्यभिचारिचिन्तायां समस्तभावानां विश्रांतिः। एवं भावशबलतापोषकाः वितर्कादयाः गुणावहाः। तेन शृङ्गाररसस्यैव उत्कर्षः। ध्वनिकारः अपि अत्र समर्थयति यत् - ''तत्र लब्धप्रतिष्ठे तु विवक्षिते रसे विरोधिरसाङ्गानां बाध्यात्वेनोक्तावदोषः। यथा क्वाकार्यं शशलक्ष्मणः इत्यादि।''

पाण्डुक्षामं वदनं हृदयं सरसं तवालसं च वपुः।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः॥

एतस्मिन् उदाहरणे प्रतिकूलानुभावग्रहणे अदोषता। अत्र 'पाण्डुता' करुणविप्रलम्भयोः अनुभावः।

सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः।
किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम्॥

अत्र बाध्यत्वेनोक्तम् विरुद्धविभावा: गुणरूपा: भवन्ति। पूर्वार्धे 'रामा:' 'विभूतय:' च पुरुषनिष्ठशृङ्गारस्य विभावौ। उत्तरार्धे 'लौल्यम्' इति शान्तरसस्य विभाव:। द्वौ रसौ विरुद्धौ तथापि न दोष:। अत्र पूर्वार्ध: बाध्यरूपम्। बाध्यत्वेन वर्णनं गुणरूपम्। मत्ताङ्गनापाङ्गभङ्गस्य वर्णनम् उपमानरूपेण, शृङ्गारस्य अनुभावरूपेण न । अत्र शान्तशृङ्गारयो: विरोध: अपि न; यत: शृङ्गारस्य प्रतीति: न भवति।

रसविरोधपरिहारस्य उपाया:

आश्रयैक्ये विरुद्धो य: स कार्यो भिन्नसंश्रय:।
रसान्तरेणान्तरितो नैरन्तर्येण यो रस:।।

अत्र रसविरोधपरिहारस्य उपाया: दर्शिता: सन्ति। अत्र रसविरोधस्य अभिप्राय: स्थायिभाव:। रसविरोध: द्विविध:

१. दैशिक: २. कालिक: च। दैशिक: अपि द्विविध: - आलम्बनैक्यविरोध:, आश्रयैक्यविरोध: च। यदा एकस्मिन् आश्रये अथवा एकालम्बनविषयकौ द्वौ रसौ न भवत: तदा आश्रयैक्यनिमित्तक: विरोध:। यथा- वीरे भयानके च। आश्रयैक्ये विरोध: भवति तदा रसानां भिन्नसंश्रय: कर्तव्य:। वीरभयानकयो: एकाश्रयत्वेन विरोध: अत: नायके वीरस्य वर्णनं कर्तव्यम् यथा च प्रतिपक्षे भयानको निवेशयितव्य:। तेन नायकगतवीरस्यापि पुष्टि: भविष्यति । कालिक: विरोध: तत्र भवति यत्र द्वौ रसौ एकत्र स्थातुं न शक्नुत: । तयो: नैरन्तर्यनिमित्तक: विरोध: । यथा शान्तशृङ्गारयोस्तु नैरन्तर्येण विरोध इति रसान्तरमन्तरे कार्यम् । नागानन्दे शान्तस्य जीमूतवाहनस्य 'अहो गीतम् अहो वादित्रम्' - इत्यद्भुतमन्तर्निवेश्य मलयवतीं प्रति शृङ्गारो निबद्ध: । ध्वनिकार: रसविरोधपरिहारविषये वर्णयति यत् -

विरुद्धैकाश्रयो यस्तु विरोधी स्थापितो भवेत् ।
स विभिन्नाश्रय: कार्यस्तस्य पोषेऽप्यदोषता ।।
एकाश्रयत्वे निर्दोषो नैरन्तर्ये विरोधवान् ।
रसान्तरव्यवधिना रसो व्यङ्ग्यो सुमेधसा।।

साहित्यदर्पणेऽपि १. आलम्बनैक्यविरोध: २. आश्रयैक्यविरोध: ३. नैरन्तर्यविरोध: च इति विरोधत्रयस्य चर्चा कृता ।

रसविरोधस्य अपवादा: -

स्मर्यमाणो विरुद्धोऽपि साम्येनाथ विवक्षित: ।

अङ्गिन्यङ्गत्वमाप्तौ यौ तौ न दुष्टौ परस्परम् ।।

अवस्थात्रये विरोधिरसानां विरोध: न भवति । १. प्रधानरसेन सह विरोधिरस: स्मर्यमाण: भवति । २. यत्र विरोधिरस: प्रधानरसेन सह साम्यभावेन विवक्षित: भवति । ३. - यत्र रसौ परस्परम् अङ्गिन्यङ्गत्वमाप्तौ।

अयं स रसनोत्कर्षी पीनस्तनविमर्दन:।

नाभ्यूरुजघनस्पर्शी नीविविस्रंसन: कर: ।।

अत्र करुणरस: प्रधान: । रसनोत्कर्षादीनां स्मरणरूपेण कथनम्। अत: शृङ्गार: स्मर्यमाण: विरोधिरस:।

दन्तक्षतानि करजैश्च विपाटितानि प्रोद्भिन्नसान्द्रपुलके भवत: शरीरे ।

दत्तानि रक्तमनसा मृगराजवध्वा जातस्पृहैर्मुनिभिरप्यवलोकितानि ।।

अत्र कामुकस्य दन्तक्षतादीनि यथा चमत्कारकारीणि तथा जनस्य । अत्र शान्तशृङ्गारयो: साम्यभावेन विवक्षा ।

क्रामन्त्य: क्षत कोमलाङ्गुलिगलद्रक्तै: सदर्भा: स्थली:

पादै: पातितयावकैरिव गलद्बाष्पाम्बुधौतामना: ।

भीता भर्तृकरावलम्बितकरास्त्वच्छत्रुनार्योऽधुना

दावाग्निं परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव ।।

अत्र चाटुके राजविषया रति: प्रतीयते। तत्र करुण इव शृङ्गारोऽप्यङ्गमिति तयोर्न विरोध: ।' क्षिप्त---०' इति पद्ये शिवविषयकरतिभाव: प्रधान: । विरुद्धौ करुणशृङ्गारौ अङ्गाङ्गिभावेन अङ्गत्वं प्राप्नुत: । अत: अत्र न विरोध: ।

।। इति दोषदर्शनो नाम सप्तम उल्लास: समाप्त: ।।

।। अष्टमोल्लासः ।।

'तददोषौ शब्दार्थौ सगुणौ अनलङ्कृती पुनः क्वापि' इति प्रथम उल्लासे काव्यलक्षणं मम्मटेन कृतम् । तत्र शब्दार्थयोः विशेषणमेकं 'सगुणौ' इति वर्तते। तस्य स्पष्टीकरणाय अत्र गुणानां विवेचनं क्रियते।

गुणालङ्कारयोः भेदः -

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।

उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।।६६।।

अत्र गुणरूपकथनं तथा च अलङ्कारात् गुणानां भेदः अपि उक्तः। गुणाः रसोत्कर्षका :- रसधर्माः। चित्तद्रुत्यादेः कार्यविशेषणस्य उत्पादकाः । अलङ्कारात् पृथक् कर्तुं गुणानां विशेषणद्वयं दर्शितम् (१) अङ्गिनः रसस्य धर्माः (२) अचलस्थितयः (१) **अङ्गिनः रसस्य धर्माः** - यथा शरीरे शौर्यादयः गुणाः आत्मनः भवन्ति तथैव काव्ये अङ्गि-रसस्य गुणाः माधुर्यादयः भवन्ति। शौर्यादयः शरीरस्य धर्माः न, तथैव गुणाः शब्दार्थयोः धर्माः न। अतः शब्दार्थाभ्यां अलङ्कारात् गुणाः भिन्नाः सन्ति। (२) **अचलस्थितयः - उत्कर्षहेतवः गुणाः** - अचला स्थितिः येषां ते तथाभूताः। रसे तु गुणानां स्थितिः अचला भवति। अर्थात् व्यभिचारेण गुणाः रसधर्माः भवन्ति। अर्थात् रसाभावे गुणाः न संभवन्ति द्वितीयं च स्थिते रसे ते (गुणाः) अवश्यम् उपकुर्वन्ति। अतः -नियमेन गुणाः रसेन सह भवन्ति। - उपस्थिताः सन्तः ते अवश्यं रसोत्कर्षं कुर्वन्ति। यथा शौर्यादयो नरस्य तथा माधुर्यादयः रसस्य एव गुणाः, न वर्णानाम्। किन्तु कुत्रचित् 'आकार एवास्य शूरः' इत्यादेर्व्यवहारात् 'शूराशूरः' इति व्यवहरन्ति। तथैव 'मधुरा वर्णाः' इति लोकव्यवहार अपि भ्रान्तिजन्यः। भ्रान्तजनाः सुकुमारादिवर्णान् एव माधुर्यादीनाम् आधारत्वेन व्यवहरन्ति। किन्तु माधुर्यादयः रसधर्माः। समुचितैर्वर्णैः तेषां अभिव्यक्तिः भवति। ते वर्णाश्रयाः न।

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।

हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।।६७।।

अलङ्काराः अपि रसोत्कर्षकाः। किन्तु ते साक्षात् न उपकुर्वन्ति। अलङ्काराः तु सन्तं रसं जातुचित् (कदाचित्) उपकुर्वन्ति। अतः परम्परया ते उपकुर्वन्ति। (१) कुत्रचित्

- वाचकवाच्यलक्षणातिशयमुखेन (शब्दार्थद्वारा) मुख्यं रसं सम्भवितमुपकुर्वन्ति। यथा-

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।
अलमलमालिमृणालैरिति वदति दिवानिशं बाला॥

इत्यत्र शब्दालङ्कारेण (अनुप्रासेन) विप्रलम्भशृङ्गाररसं सम्भविनमुपकुर्वन्ति।

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव।
हिनस्ति प्रत्यङ्गज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति न चाम्बा न भवती॥

इत्यत्र - मालोपमारूपार्थालङ्कारेण विद्यमानं विप्रलम्भशृङ्गाररसम् उपकुर्वन्ति। (२) यत्र रसः नास्ति तत्र उक्तिवैचित्र्यमात्रपर्यवसायिनः भवन्ति। यथा 'स्वच्छन्दोच्छलदच्छ - --- ०' (३) क्वचित् तु सन्तमपि नोपकुर्वन्ति। यथा -

चित्ते विघटते न त्रुटयति सा गुणेषु
शय्यासु लुठति विसर्पति दिङ्मुखेषु।
वचने वर्तते प्रवर्तते काव्यबन्धे
ध्याने न त्रुटयति चिरं तरुणी प्रगल्भा॥

इत्यत्र अनुप्रासशब्दालङ्कारः वर्तते। किन्तु टकारस्य प्रयोगः विप्रलम्भस्य उत्कर्षकः न अपि तु अपकर्षकः भवति। '**मित्रे क्वापि गते सरोरुहवने** --- ०' इत्यात्रापि 'अर्गलेव' इति उपमालङ्कारः विप्रलम्भशृङ्गारस्य उत्कर्षं न करोति। अतः अलङ्कारस्य गुणभेदकानि त्रीणि लक्षणानि -रसोपकारत्वे सति रसवृत्तित्वम् - अर्थात् रसोत्कर्षहेतुः सन् अपि रसधर्माः न। - रस व्यभिचारित्वम् - अर्थात् - यत्र रसः न भवति तत्र उक्तिवैचित्र्यमात्रम्। - अनियमेन रसोपकारकत्वम् - अर्थात् विद्यमानं रसमपि न उपकुर्वन्ति। आचार्यमम्मटस्य गुणालङ्कारयोः विवेचनं ध्वनिकारानुगुणं वर्तते। पश्य -

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्॥

साहित्यदर्पणकारोऽपि मम्मटस्यानुसरणं करोति यत् -

'रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो गुणाः।'

भट्टोद्भटस्य खण्डनम्

''समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः, ओजः प्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवैषां भेद :'' इत्यभिधानमसत् । भामहादीनाम् आलङ्कारिकाणां विवेचने गुणालङ्कारयोः भेदः स्पष्टः नासीत् । केचन आचार्याः समवाय-संयोग-सम्बन्धेन भेदं दर्शयन्ति। भट्टोद्भटोपि 'भामहविवरण' नाम्नि ग्रन्थे प्रदर्शयति यत्- 'शरीरे शौर्यादयः समवायवृत्त्या भवन्ति किन्तु हारादयः तु संयोगसम्बन्धेन भवन्ति । काव्यशरीरे गुणालङ्काराणां समवायवृत्त्या स्थितिः । तत्र कोऽपि वास्तविकः भेदः न तथापि गड्डलिका प्रवाहेण केचनं वदन्तः सन्ति । आचार्यमम्मटानुसारेण तु गुणालङ्कारयोः भेदः स्पष्टः एव । ध्वनिवादिनः रसनिष्ठधर्मान् गुणान् वदन्ति तथा च शब्दार्थनिष्ठधर्मान् अलङ्कारान् भणन्ति।

वामनाचार्यस्य खण्डनम्

आचार्यवामनेन गुणालङ्कारयोः भेदनिरूपणम् इत्थं कृतम्। काव्यशोभायाः कर्तारो धर्मा गुणाः । तदतिशयहेतवस्त्वलङ्काराः । इति न युक्तम् । यदि काव्यशोभाजनकाः गुणाः तर्हि - किं समस्तैर्गुणैः काव्यव्यवहारः भवति ?- उत कतिपयैर्गुणैः काव्यव्यवहारः भवति ? वामनानुसारं **'रीतिरात्मा काव्यस्य ।' 'सा त्रेधा वैदर्भी गौडीया पाञ्चाली चैति ।'** समग्रगुणा वैदर्भी । औजःप्रसादप्रमुखैर्गुणैरुपेता वैदर्भी नाम रीतिः। ओजःकान्तिमती गौडीया । माधुर्यसौकुमार्योपपन्ना पाञ्चाली । यदि समस्तैः गुणैः काव्यव्यवहारः भवति चेत् वैदर्भी एव काव्यस्यात्मा भवितुं शक्नोति । यदि कतिपयैः गुणैः काव्यव्यवहारः भवति चेत् गौडीया पाञ्चाली च एव काव्यास्यात्मा भवितुं शक्नुतः । यथा - **'अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः ।'** इत्यत्र ओजःप्रभृतिषु गुणेषु सत्सु काव्यव्यवहारप्राप्तिः भविष्यति । यन्नेष्टम् । यदि काव्यशोभायाः अभिवर्धकाः अलङ्काराः चेत् गुणाभावेन अपि काव्यव्यवहारः भवति । गुणनिरपेक्षे सति कथम् अलङ्काराः शोभायाः अभिवर्धकाः भवन्ति ? यथा -

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनि ।

अस्या रदच्छदरसो न्यक्करोतितरां सुधाम् ।।

इत्यत्र विशेषोक्तिव्यतिरेकौ स्तः। गुणाः न, तथापि काव्यव्यवहारस्य तौ प्रवर्तकौ । अत एव वामनेन दत्तं गुणालङ्कारयोर्भेदलक्षणं युक्तं न।

गुणानां भेदाः

आचार्यमम्मटेन 'गुणाः रसधर्माः' इति उक्तम् । तस्य आधारेण गुणानां त्रयः भेदाः भवन्ति-माधुर्यः ओजः प्रसादः च । रसास्वादे सामाजिकस्य त्रिधा अवस्था भवति। १. चित्तद्रुतिः २. चित्तविस्तारः ३. चित्तविकासः शृङ्गारकरुण-शान्तासु चित्तद्रुतिः । वीर -रौद्र-बीभत्सु चित्तविस्तारः। हास्ये मुखस्य विकासः, अद्भुते चक्षुषोः विकासः, तथा च भयानके गमनस्य विकासः । अतः रसास्वादस्य अवस्थावशात् गुणाः त्रयः । **माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश । १. माधुर्यम् - आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्** । माधुर्यम् शृङ्गारादीनाम् उत्कर्षकम् । तस्य विशेषः धर्मः । श्रृङ्गाररसः आनन्दरूपः। तेन कारणेन चित्तद्रुतिः भवति । आह्लादकत्वेन चित्तद्रवणं जायते । अतः शृङ्गारे आह्लादकत्वेन यः विशेषः धर्मः चित्तद्रवणं करोति सः माधुर्यम्। अत्यन्तद्रुतिहेतुत्वात् माधुर्यं शृङ्गारस्य अपेक्षया करुणे, करुणस्य अपेक्षया विप्रलम्भे, विप्रलम्भस्य अपेक्षया शान्ते च अधिकम्। करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्। श्रव्यं नातिसमस्तार्थशब्दं मधुरमिष्यते इति भामहाचार्यः। **२. ओजः - दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थिति** दीप्तिः चित्तस्य विशेषा वृत्तिः। तथा मनः प्रज्वलितं भवति । चित्तविस्तारः भवति । चित्तद्रुतेः भिन्ना एषा अवस्था । दीप्तिजनकः यः रसधर्मः स एव ओजः । **३. प्रसादः**

शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः ।
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ।

शुष्केन्धनाग्निवत् स्वच्छजलवत् सर्वेषु रसेषु सर्वासु रचनासु यः भवति सः प्रसादः। सर्वेषां रसानां धर्मः प्रसादः । सर्वाः रचनाः प्रसादव्यञ्जिकाः भवितुं शक्नुवन्ति। एते माधुर्यादयः रसधर्माः । कुत्रचित् मधुरः शब्दः मधुरः अर्थः च इति व्यवहारः दृश्यते। मम्मटेनापि शब्दार्थौ सगुणौ...० इति उक्तम्। अत आकार एवास्य शूरवत् माधुर्यादयः गुणवृत्त्या (गौणरूपेण) उपचारेण रसधर्मेषु सति शब्दार्थयोरपि भवन्ति । **गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोः मता ।**

वामनोक्त-शब्दगुणानां खण्डनम्

वामनोक्तदशगुणाः एते - ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थ व्यक्तिकान्तयो बन्धगुणाः । बन्धगुणाः इत्युक्ते शब्दगुणाः । वामनोक्तदशशब्दगुणानां लक्षणानि एवं सन्ति ।

१. गाढबन्धत्वमोजः - पदरचनायां शिथिलतायाः अभावः ओजः।

२. शैथिल्यं प्रसादः - पदरचनायाः शिथिलता प्रसादः ।

३. मसृणत्वं श्लेषः - अनेकपदानामेकपदभासमानेन श्लेषः ।

४. मार्गाभेदः समता - आरम्भतः अन्तपर्यन्तमार्गस्य अत्यागः समता।

५. आरोहावरोहक्रमः समाधिः - गाढत्वशैथिल्यतयोरारोहावरोहेण समाधिः।

६. पृथक्पदत्वं माधुर्यम् - अदीर्घसमासेन माधुर्यम् ।

७. अजरठत्वं सौकुमार्यम् - अजरठत्वम् अर्थात् अपारुष्यम् कोमलता।

८. विकटत्वमुदारता - विकटत्वम् अर्थात् नृत्यप्रायस्ता ।

९. अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः - येन शीघ्रमेवार्थबोधः भवति सः अर्थव्यक्तिः।

१०. औज्ज्वल्यं कान्तिः - पदरचनायां लालित्यमेव कान्तिः ।

मम्मटानुसारं त्रयः ते न पुनर्दश । अतः वामनाभिमत दशशब्दगुणानां स एवं खण्डनं करोति । वामनोक्तदशशब्दगुणेषु श्लेषः, समाधिः, उदारता, प्रसादः, ओजः, तेषामन्तर्भावः ओजसि भवति । माधुर्यं प्रकारान्तरात् साक्षात् स्वीकृतम्। अर्थव्यक्तिः प्रसादेन गृहीतः । सौकुमार्यं कान्तिश्च दोषाभावात् । समता कुत्रचित् (क्वचित्) दोषत्वं प्राप्नोति । एवं न दश शब्दगुणाः । अत एव मम्मटेन उक्तम् - यत्

केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः।

अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश।।

वामनोक्ताम्अर्थगुणानां खण्डनम् -

वामनोक्तर्थगुणानाम् आवश्यकता नास्ति। यतः तेषु गुणेषु केचन माधुर्यादिषु समाविष्टाः भवन्ति। केचन वैचित्र्यमात्रं न गुणाः। केचन दोषाभावमात्रम्। १. **अर्थस्य प्रौढिरोजः -** एषा प्रौढिः पञ्चधा-पदार्थे वाक्यरचना, वाक्यार्थे पदाभिधान, विस्ताररूपा , समासरूपा, साभिप्रायत्वम् च। उपरोक्तेषु प्रथमचतुर्षु प्रकारेषु प्रौढिः वर्तते सा तु उक्तिवैचित्र्यमात्रम्। अवशिष्टा साभिप्रायत्वरूपा। प्रौढिः अपुष्टार्थत्वं दोषाभावमात्रम्। २. **अर्थवैमल्यं प्रसादः** - अर्थात् अपेक्षितार्थस्य स्पष्टा प्रतीतिः। एषः प्रसादः अधिकपदत्वदोषाभावमात्रम्। ३. **उक्तिवैचित्र्यं माधुर्यम् -**अर्थात् एकस्य अर्थस्य भिन्नप्रकारेण (भङ्ग्यन्तरेण) कथनं क्रियते तदा माधुर्यम्। एषः अनवीकृतत्वदोषाभावमात्रम्। ४. **अपारुष्यं सौकुमार्यम्** - एषः गुणः

ध, भ) एताभ्यां वर्गाभ्यां सह) २. रेफेण अधः उपरि उभयत्र वा कस्यचित् वर्णस्य- ३. तुल्ययोः तेन सह सम्बन्धः (यथा-क्ति, उदामादयः) ४. टवर्गम् अर्थात् णकारं त्यक्त्वा (ट - ठ - ड - ढ), तेषां प्रयोगः) ५. शकारषकारयोः प्रयोगेण ६. दीर्घसमासः ७. विकटरचना ओजसः व्यञ्जिकाः। **यथा - मूर्ध्नामुद्वृत्तकृत्तेत्यादि......॥**

श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्।

साधारणः समग्राणां स प्रसादो गुणो मतः॥

श्रवणमात्रेण शब्दात् अर्थस्य प्रतीतिः भवति सः सर्वेषु रसेषु सर्वासु रचनासु स्थितः गुणः प्रसादः। उदाहरणम् - **परिम्लानं पीनस्तनजघन....... ० वर्णादीनां व्यञ्जकतायाम् अपवादः**

यद्यपि सङ्घटनादयः (रचना, वर्णः, समासः च) गुणपरतन्त्रा तथापि क्वचित्क्वचित् वक्तृ-वाच्य-प्रबन्धानामौचित्येन रचनादीनाम् अन्यथा इष्यते। आनन्दवर्धनाचार्योऽपि सङ्घटनाविषये एतत् एव वदति यत् - **रसान् तन्नियमने हेतुरौचित्यं वक्तृवाच्ययोः। १. यथा - वक्तुः औचित्यात् -** 'मन्थायस्तार्णवाम्भः ....०' इत्यत्र वाच्यं क्रोधादिव्यञ्जकम् न। काव्यमपि अभिनेयार्थं तथा च दीर्घसमासा रचना वर्तते। किन्तु अत्र वक्ता भीमसेनः । अतः वक्तुः औचित्यात् रचनादयः, न गुणाभिव्यञ्जकेन। २. **वाच्यऔचित्यात् - यथा - 'प्रौढोच्छेद......०'** इति पद्ये वक्ता वैतालिकः। तस्य वचने दीर्घसमासरचना न अपेक्षिता, तथापि दीर्घसमासरचना हि शोभादायिका। अतः वाच्यौचित्यादेव रचनादयः। ३. **क्वचित् प्रबन्धौचित्यात्** रचनादयः अन्यथा इष्टं भवति। यथा - आख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः (कोमलवर्णादयः) कथायां रौद्रेऽपि नात्यन्तमुद्धताः वर्णरचनादिः प्रयुज्यते। नाटकादौ रौद्रेऽपि न दीर्घसमासादयः।

॥ इति गुणालङ्कारभेदनियतगुणनिर्णयो नाम अष्टम उल्लासः समाप्तः॥

।। नवमोल्लासः ।।

मम्मटानुसारं षड् शब्दालङ्काराः १. वक्रोक्तिः २. अनुप्रासः ३. यमकम् ४. श्लेषः ५. चित्रम् ६. पुनरुक्तवदाभासः

१. वक्रोक्ति :

यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा।।

यदा वक्तृ-द्वारा उक्तम् वाक्यम् अन्येन श्लेषेण काक्वा वा अन्यथा योज्यते तदा वक्रोक्तिः भवति। वक्रोक्तिः द्विधा - श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च। श्लेषवक्रोक्तिरपि पदभङ्गश्लेषेण अभङ्गश्लेषेण वा भवति। **पदभङ्गश्लेषेण यथा -**

नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो
वामानां प्रियमादधाति हितकृन्नैवाबलानां भवान्।
युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः
सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः।।

एतस्मिन् श्लोके नारीणां - वामानां - हितकृत् - बलाभावप्रसिद्धात्मनापदानि श्लिष्टानि सन्ति। अत्र वक्तुरन्यार्थकशब्दानाम् अन्यार्थद्वारा श्रोता प्रश्नोत्तरं करोति। यथा नारीणाम् **'इत्यत्र न अरीणाम्'** तथा च **'अबलानाम् इत्यत्र न बलं येषां ते अबलाः'** एवं समासेन रूपं साध्यते अतः सभङ्गश्लेषः। **अभङ्गश्लेषेण यथा -**

अहो केनेदृशीबुद्धिर्दारुणा तव निर्मिता।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्।।

अत्र वक्तृद्वारा **'परुषत्वेन'** (कठोरतया) प्रयुक्तं दारुणा इति शब्दस्य भिन्नः **'काष्ठेन'** अर्थः स्वीक्रियते। अत्र पदभङ्गः भवति अतः अभङ्गश्लेषेण वक्रोक्तिः। **काक्वा यथा-** काकु अर्थात् **'वर्णध्वनेः विकारः'**। अथवा - भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते।।

गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतो गन्तुम्।

अलिकुलकोकिलललिते नेष्यति सखि ! सुरभिसमयेऽसौ ॥

अत्र '**सुरभिसमयेऽसौ नेष्यति**' इति काक्वा वदति अतः नायकः अवश्यम् इष्यति इति अर्थः भवति। तेन काकुवक्रोक्तिः।

२. अनुप्रासः

अनुप्रासः

- वर्णानुप्रासः
  - छेकानुप्रासः
  - वृत्त्यनुप्रासः
    - उपनागरिका
    - परुषा
    - कोमला
- पदानुप्रासः (लाटानुप्रासः)
  - १. अनेकपदानामावृत्तिरूपः
  - २. एकपदस्यावृत्तिरूपः
  - ३. एकसमासाऽऽवृत्तिरूपः
  - ४. भिन्नसमासाऽऽवृत्तिरूपः
  - ५. समासासमासाऽऽवृत्तिरूपः

वर्णसाम्यमनुप्रासः - स्वरभेदे सति व्यञ्जनानां वर्णानां साम्यं भवति तदा वर्णानुप्रासः भवति। रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः। अर्थात् रसाद्यनुकूलवर्णानां प्रकृष्टः सन्निवेशः वर्णानुप्रासः। **छेकवृत्तिगतो द्विधा :** अनुप्रासस्य प्रकारद्वयम् - छेकानुप्रासो वृत्त्यनुप्रासश्च। **छेकानुप्रासः - सोऽनेकस्य सकृत्पूर्वः** - अनेकस्य अर्थात् व्यञ्जनस्य सकृदेकवारं सादृश्यं (आवृत्तिः) छेकानुप्रासः। अनेकव्यञ्जनानाम् एकवारं सादृश्यम्। यथा-

ततोऽरुणपरिस्यन्दमन्दीकृतवपुः शशी।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥

अत्र पकारस्य तथा च नादिवर्णानाम् एकवारं सादृश्यम् अतः छेकानुप्रासः।

वृत्त्यनुप्रासः

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।
अलमलमालि ! मृणालैरिति वदति दिवानिशं बाला ॥

एतस्मिन् श्लोके रकारस्य ककारस्य लकारस्य मकारस्य च पुनः पुनः आवृत्तिवशात् (सादृश्यवशात्) वृत्त्यनुप्रासः।

माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते।

ओजः प्रकाशकैस्तैस्तु परुषा कोमला परैः॥

वृत्तिः रीतिः मार्गः सङ्घटना शैली च एते शब्दाः समानार्थकाः। उद्भटः **'वृत्तिः'** इति शब्दं प्रयोजयति। वामनः रीतीति प्रयोगं करोति। दण्डिकुन्तकादय **'मार्गः'** तथा च आनन्दवर्धनाचार्यः **'सङ्घटना'** इत्यस्य व्यवहारं करोति। मम्मटाचार्यः गुणवृत्तिरीत्यादेः वृत्त्यनुप्रासे समन्वयं करोति। **लाटानुप्रासः (पदानुप्रासः) - शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः।** शब्दार्थयोरभेदेऽपि अन्वयमात्रभेदात् (उद्देश्यविधेयभावात् वा तात्पर्यमात्रतः) शब्दगतोऽनुप्रासः लाटानुप्रासः। लाटजनवल्लभत्वात् लाटानुप्रासः। अन्ये पदानुप्रासः इति वदन्ति। **लाटानुप्रासोऽपि पञ्चविधः** १. अनेकपदानामावृत्तिरूपः। २. एकपदस्यावृत्तिरूपः। ३. एकसमासाऽऽवृत्तिरूपः। ४. भिन्नसमासाऽऽवृत्तिरूपः। ५. समासासमासाऽऽवृत्तिरूपः। **१. अनेकपदानामावृत्तिरूपः**

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।

यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य॥

अत्र सविधे - दयितेत्यादीनां बहूनां तात्पर्यमात्रभेदेनावृत्तिरिति अनेकपदगतो लाटानुप्रासः। २. **एकपदस्यावृत्तिरूपः यथा -**

वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः।

सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत्॥

अत्र **'सुधाकरः'** इत्यस्य एकस्य पदस्य तात्पर्यभेदेन आवृत्तिः अतोऽत्र एकपदस्यावृत्तिरूपः। एकस्मिन् समासे, भिन्ने वा समासे, समासासमासयोर्वा पदस्य सारूप्यम्।

उदाहरणम् -

सितकरकररुचिरविभा विभाकराकार! धरणिधर! कीर्तिः।

पौरुषकमला कमला साऽपि तवैवास्ति नान्यस्य॥

एतस्मिन् श्लोके **'कर'** इत्यस्य एकस्मिन् समासे, **'विभा'** इत्यस्य भिन्ने समासे

तथा च कमला इत्यस्य समासासमासयोः आवृत्तिः।

३. यमकालङ्कारः

अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः यमकम्।

अर्थात् अर्थे सति भिन्नार्थानां वर्णानां तथा क्रमेण (समानाकारः) पुनरावृत्तिः भवति तदा यमकालङ्कारः। स्थानद्वयेऽपि आवृत्तवर्णाः सार्थकाः भवेयुरिति नावश्यकम्। लाटानुप्रासे पदानामावृत्तिः भवति किन्तु तत्र तात्पर्यमात्रतः भेदः। यमकेऽपि वर्णानामावृत्तिः भवति किन्तु यदि आवृत्तपदानि सार्थकानि भवन्ति चेत् अर्थभेदः आवश्यकः। अन्यथा कुत्रचित् एकपदं सार्थकं तथा च द्वितीयपदम् अनर्थकमपि भवितुमर्हति परंतु यत्र भागद्वयं सार्थकं भवति तत्र तु भिन्नार्थकत्वं अनिवार्यमेव। **यथा -** समर समरसोऽयम्। **यमकस्य प्रकाराः - पादतद्भागवृत्ति तद्यात्यनेकताम्।** यमकस्य पदावृत्तिगता एकादशप्रकाराः भवन्ति। १. प्रथमपादं द्वितीयपादे आवृत्तं भवति तदा मुखयमकम्। २. प्रथमं तृतीयपादे आवृत्तं भवति तदा सन्दंशयमकम्। ३. प्रथमं चतुर्थपादे आवृत्तं भवति तदा आवृत्तियमकम्। ४. द्वितीयपादं तृतीयपादे आवृत्तं भवति तदा गर्भयमकम्। ५. द्वितीयपादं चतुर्थपादे आवृत्तं भवति तदा सन्दष्टयमकम्। ६. तृतीयपादं चतुर्थे आवृत्तं भवति तदा पृच्छयमकम्। ७. प्रथमपादं द्वितीये तृतीये चतुर्थे च आवृत्तं भवति तदा पङ्क्तियमकम्। ८. प्रथमपादं द्वितीये तृतीयपादं चतुर्थे च आवृत्तं भवति तदा युग्मकयमकम्। ९. प्रथमपादं चतुर्थे द्वितीयपादं तृतीयस्थाने च आवृत्त भवति तदा परिवृत्तियमकम्। १०. श्लोकार्ध आवृत्तिरूपः। ११. श्लोकावृत्तिरूपः। उपरोक्तं श्लोकावृत्तिरूपं विहाय अन्येषां पादाभागवृत्तिद्वारा त्रिंशत् भेदाः। आहत्य चत्वारिंशत् भेदाः भवन्ति।

सन्नारीभरणोमायमाराध्य विधुशेखरम्।
सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय॥

अत्र प्रथमपादं तृतीयपादे आवृत्तं भवति। अतः सन्देशयमकम्। 'विनायमेनो-०' इत्यत्र युग्मयमकम्। एवं मम्मटाचार्यः अत्र क्रमशः उदाहरणानि प्रयच्छति।

४. शब्दश्लेषः

वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः।
श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा॥

अर्थात् - भिन्नार्थबोधकशब्दाः समानाकारशब्दाः युगपद् उच्चारणेन जतुकाष्ठन्यायेन

परस्परं मिलित्वा एकीभवन्ति तदा श्लेषः नाम्नो अलङ्कारः भवति। वस्तुतः **'सकृत्प्रयुक्तः शब्दः सकृदेव अर्थं गमयति।'** अर्थात् एकवारं प्रयुक्तः शब्दः एकवारं हि अर्थबोधं कारयितुं शक्नोति। **'प्रत्यर्थं शब्दा भिद्यन्ते'** इति सिद्धान्तानुसारं भिन्नशब्दप्रयोगत्वम् अपेक्षते। किन्तु यत्र समानाकारशब्दद्वयं जतुकाष्ठन्यायेन मिलित्वा एकीभवति तत्र वक्ता पदद्वयस्य वारद्वयं उच्चारणमकृत्वा एकस्य शब्दस्यैव प्रयोगं करोति, तत्र शब्दश्लेषः भवति।(१) गोविन्दठक्कुरानुसारम् एकवृन्तगतफलद्वयन्यायेन अत्र अर्थद्वयस्य प्रतीतिः भवति। शब्दश्लेषोऽपि अक्षरादिभिः अष्टधा भवति **'स च वर्ण-पद-लिङ्ग-भाषा-प्रकृति-प्रत्यय-विभक्ति-वचनानां भेदादष्टधा।' भेदाभावात्प्रकृत्यादेर्भेदोऽपि नवमो भवेत्।** अर्थात् प्रकृतिप्रत्यययोः भेदाभावात् अभङ्गश्लेषः नाम्नो नवमः भेदः भवति। यथा-

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव !।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्।।

एतस्मिन् श्लोके **'पृथुकार्तस्वरपात्रं'** भूषितनिःशेषपरिजनं विलसत्करेणुगहनं च इति पादत्रयेऽपि श्लेषः। **पृथुकार्तस्वरपात्रम्** - १. पृथुकानां बालानाम् आर्तस्वरस्य पात्रम्। (दरिद्रपक्षे) २. पृथूनि महान्ति कार्तस्वरस्य सुवर्णस्य पात्राणि यस्मिन् तत्। (नृपपक्षे) **भूषितनिःशेष परिजनम्** - १. भुवि पृथिव्याम् उपेताः शेरते सर्वे परिजना यस्मिन्। (दरिद्रपक्षे) २. सर्वैः सेवकैः अलङ्कृतम्। (नृपपक्षे) **विलसत्करेणुगहनम्** - १. विलसत्काः मूषकाः तेषां रेणुः धूलिः तया गहनम्। (दरिद्रपक्षे) २. विलसन्तीभिः करेणुभिर्गहनं व्याप्तं गहनम्। (नृपपक्षे) अत्र सदनद्वयस्य समता श्लिष्टपदैः कृता अतः पदश्लेषः।

अलङ्कारः शङ्काकरनकरपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी।

अत्र **'विधौ'** इत्यत्र वर्णश्लेषः। अत्र विधिः विधुः च इति शब्दद्वयस्य एकवारं युगपद् उच्चारणम्।

भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये।
लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती,

युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः॥

अत्र हरेः नेत्रे तनुर्वो युष्माकं संसारार्त्तिशमनं कुरुताम्। कीदृशी नेत्र भक्तिप्रह्वविलोकनप्रणयिनी, कीदृशी तनुश्च भक्तिप्रह्वलोकनप्रणयिनी। नीलोत्पलस्पर्द्धित्वं नेत्रपक्षे संनिवेशवैशिष्ट्येन तनुपक्षे श्यामत्वादिमात्रेण। नेत्रपक्षे हितप्राप्तये अनुकूलार्थसिद्धये नीते। तनुपक्षे नीता ईहितप्राप्तये। नेत्रपक्षे महानिधी इति द्विवचनम्। लक्ष्मीदृशोः रसिकतां तन्वती। नेत्रपक्षे कुरुतामिति लोट् परस्मैपदद्विवचनम्। तनु पक्षे आत्मनेपदैकवचनम्। अत्र स्त्रीनपुंसकानां शब्दानां यत्र यत्र वचनलघुत्वदीर्घत्वसमासैः सारूप्यं सः लिङ्गश्लेषो तथा नीते हितप्राप्तये इति च महानिधी इति च वचनश्लेषोऽपि। **'महदेसुरसन्धम्मे---०'** इत्यत्र भाषाश्लेषः। **'अयं सवार्णि---०'** इत्यत्र प्रकृतिश्लेषः। **'रजनिरमणमौलेः---०'** इत्यत्र प्रत्ययश्लेषः। **'सर्वस्वं---०'** इत्यत्र च विभक्तिश्लेषः। अभङ्गश्लेषस्य उदाहरणं यथा-

योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते॥

अत्र गोत्रशब्दः कुलपर्वतयोः, पक्षा वर्ग्याः पतत्राणि च। क्षण उत्सवश्च, शतकोटिदः शतं कोटीर्ददाति यः, शतकोटिना वज्रेण खण्डयति द्यति च। विबुधाः पण्डिता देवाश्च। अत्र प्रकरणादिना चाभिधाया अनियन्त्रितत्वात् श्लेष एव न तु ध्वनिः।

५. चित्रालङ्कारः

तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता।


यत्र काव्ये वर्णानां रचना खड्गाद्याकृतिहेतुवशात् भवति तत्र चित्रालङ्कारः वर्तते। अर्थात् यत्र सन्निवेशविशेषेण न्यस्ताः वर्णाः खड्ग-मुरज - पद्माद्याकारमुल्लासयन्ति तत्र चित्रालङ्कारयुक्तं काव्यं भवति।

खड्गबन्धः -

माराशिक्र रामे भमुखे रासाररंहसा।
साराब्धस्तवा नित्यं तदार्तिहरणक्षमा॥
माता नतानां सङ्घट्टः श्रियां बाधितसम्भ्रमा।
मान्याऽथ सीमा रामाणां शं मे दिश्यादुमादिमा॥

मम्मटाचार्यः खड्गबन्धस्य उदाहरणे **'माराशिक्र---०'** तथा **'माता नतानां---०'** इति श्लोकद्वयं प्रयच्छति। श्लोकद्वयेनात्र खड्गस्य आकृतिः भवति।


अधोलिखितचित्रानुसारं द्राढिकान्तरे **'मा'** इति शब्दं लिखतु। तस्य दक्षिणतः अधः क्रमेण **'रा'** तः **'ह'** पर्यन्तं वर्णाश्चतुर्दश। शिखायां साधारणः **'सा'** इति शब्दः। ऊर्ध्वक्रमेण वामतः चतुर्दशैव यावन्माशब्दः। तस्यैव माशब्दस्य दक्षिणतः निस्सरणक्रमेण, वामतश्च प्रवेशक्रमेण वर्णाः सप्त सप्त। एषा द्राढिका। ततः माशब्दादूर्ध्वक्रमेण गण्डिकायां वर्णत्रयी उपरि मा शब्दः साधारणः। तस्य दक्षिणतो वामतश्च तथैव चत्वारश्चत्वारो वर्णाः। एतच्च कुलकम्। ततः तस्य माशब्दस्य उपरि वर्णद्वयम्। एतत् मस्तकम्। सा-मा-मा-शब्दाः द्विपञ्चकृत्वः द्विरावृत्ताः।



मुरजबन्धः

सरला बहुलारम्भतरलालिवलारवा।
वारवाबहुलामन्दकरलाबहुलामला॥


अत्र **'सरला---०'** इति श्लोकस्य पादचतुष्टयेन पङ्क्तिचतुष्टये कृते प्रथमादिपादेभ्यः प्रथमपादाद्यक्षराणि चत्वारि। चतुर्थादिपादेभ्यः पञ्चमादीनि चत्वारि गृहीत्वा प्रथमः पादः। द्वितीयात् प्रथमं, प्रथमात् द्वितीयतृतीये, द्वितीयतृतीयाभ्यां चतुर्थे, चतुर्थात् तृतीयद्वितीये, तृतीयाच्च पादात् प्रथममक्षरं गृहीत्वा द्वितीयः पादः। द्वितीयादष्टमं, प्रथमात् सप्तमषष्ठे, द्वितीयतृतीयाभ्यां पञ्चमे, चतुर्थात् षष्ठसप्तमे, तृतीयादष्टमं च गृहीत्वा तृतीयः पादः। चतुर्थादिभ्यः प्रथमादीनि प्रथमादिभ्यः पञ्चमादीनि गृहीत्वा चतुर्थः पादः।



पद्मबन्धः

भासते प्रतिभासार ! रसाभाताहताविभा।
भावितात्मा शुभा वादे देवाभा बत ते सभा॥

'भासते---०' इति पद्यस्य अधोलिखितानुसारं **'भा'** इति शब्दः कर्णिकास्थाने। ततः अक्षरद्वयेन एकं दिग्गदलं, निर्गमप्रवेशाभ्यां भाशब्दं यावत्। ततः निःसरणक्रमेण विदिग्दलं चाक्षरद्वयेन प्रवेशक्रमेण। ततः स एव भाशब्दः। ततोऽक्षरद्वयेन दिग्दलम्। ततोऽक्षरद्वयेन विदिग्दलम्। निर्गमेण तावतैव दिग्दलम्। प्रवेशेन भाशब्दं यावत्। पुनर्भाशब्दः निर्गमेण च तावदक्षरद्वयम् इत्यादिना क्रमेण दलाष्टकम् उत्पाद्यमिति। विदिग्दलवर्णानां द्विः, भाशब्दस्य च अष्टकृत्वः आवृत्तिः।



सर्वतोभद्रम्

रसासार ! रसा सारसायताक्ष ! क्षतायसा।

सातावात ! तवातासा रक्षतस्त्वस्त्वतक्षर !।।

अधोनिर्दिष्टचित्रानुसारम् अत्र न केवलं अधोधः क्रमेण स्थितानां पादानां प्रातिलोम्येन स्थितिः, यावदर्धभ्रमस्यापि। प्रथमादिपादानां प्रथमैः, चतुर्थतृतीयद्वितीयप्रथमपादानाम् अष्टमैश्चाक्षरैः प्रथमः पादः। एवं द्वितीयसप्तमैः तृतीयषष्ठैः चतुर्थपञ्चमैश्च द्वितीयतृतीयचतुर्थपादाः। इह स सर्वत्र तदेवोपलभ्यते इति अर्थभ्रमस्याप्यवस्थानात् सर्वतोभद्रम्।

र	सा	सा	र	र	सा	सा	र
सा	य	ता	क्ष	क्ष	ता	य	सा
सा	ता	वा-	त	त	वा	ता	सा
र	क्ष	त	स्त्व	स्त्व	त	क्ष	र

सर्वतोभद्रे सर्वतः भ्रमणं कृत्वा यत् पठितुं शक्यते। अतः एतस्य अपरं लक्षणं अस्ति। **'तदिष्टं सर्वतोभद्रं भ्रमणं यदि सर्वतः'। सुधासागरकारानुसारं 'एते हि शक्तिमात्रप्रकाशकाः न तु काव्यरूपतां दधत्यतिनीरसत्वादिति।'**(३)

६. पुनरुक्तवदाभासः

पुनरुक्तवदाभासो विभिन्नाकारशब्दगा।

एकार्थतेव शब्दस्य तथा शब्दार्थयोरयम्।।

विभिन्नाकारशब्देषु असमानार्थतायां सति प्रतीमाना समानार्थता दृश्यते तदा पुनरुक्तवदाभासोऽलङ्कारः भवति। भिन्नरूपसार्थकानर्थकशब्दनिष्ठमेकार्थत्वेन मुखे भासनं पुनरुक्तवदाभासः। अर्थात् भिन्नरूपेण सार्थकानर्थकशब्देषु आपाततः समानार्थता (एकार्थता) प्रतीयते तदा पुनरुक्तवदाभासः। सः द्विवधः शब्दस्य शब्दार्थयोश्च। शब्दस्यापि द्विविधः। शब्दनिष्ठसभङ्गः शब्दनिष्ठोऽभङ्गः च।

यथा शब्दस्य -

१. **अरिवधदेहशरीरः सहसा रथिसूततुरगपादातः।**

भाति सदानत्यागः स्थिरतायामवनितलतिलकः।।

एतस्मिन् उदाहरणे **'देहः- शरीरम्', 'सारथि - सूतः', 'दानम् - त्यागः'**, इति

शब्दानाम् आपाततः पुनरुक्तिः दृश्यते। श्लोके सर्वत्र सभङ्ग अतः शब्दनिष्ठाभङ्गः।

२. **चकासत्यङ्गनारामाः कौतुकानन्दहेतवः।**

तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः॥

अत्र '**अङ्गनाः - रामाः**', '**कौतुकः - आनन्दः**', '**सुमनसः - विबुधाः**' इति शब्दाः आपाततः पुनरुक्तवत् प्रतीयन्ते। किन्तु यदि अर्थस्य विषये चिन्तयामः चेत् पुनरुक्तिः न भवति। अतः शब्दनिष्ठाभङ्गस्य उदाहरणम्। **शब्दार्थयोः यथा -**

तनुवपुरजघन्योऽसौ करिकुञ्जररुधिर रक्तखरनखरः।

तेजोधाममहः पृथुमनसामिन्द्रो हरिर्जिष्णुः॥

अत्र तनुकुञ्जररक्तादिपदानां परिवर्तने अलङ्कारः नार्हति अतः शब्दाश्रित एषः भागः। वपुकरिरुधिरादिपदानां परिवर्तनेऽपि अलङ्कारः भवति अत एषः भागः अर्थनिष्ठ, अत एष उभयालङ्कारः।

॥ इति शब्दालङ्कारनिर्णयो नाम नवम उल्लासः समाप्तः॥

॥ दशमोल्लासः ॥

काव्यप्रकाशे मम्मटायार्येण दशमोल्लासे ६१ अर्थालङ्काराणां विवेचनं कृतमस्ति। १. उपमा २. अनन्वयः ३. उपमेयोपमा ४. उत्प्रेक्षा ५. ससन्देहः ६. रूपकम् ७. अपह्नुतिः ८. श्लेषः ९. समासोक्तिः १०. निदर्शना ११. अप्रस्तुतप्रशंसा १२. अतिशयोक्तिः १३. प्रतिवस्तूपमा १४. दृष्टान्तः १५. दीपकम् १६. तुल्ययोगिता १७. व्यतिरेकः १८. आक्षेपः १९. विभावना २०. विशेषोक्तिः २१. यथासंख्यम् २२. अर्थान्तरन्यासः २३. विरोधः २४. स्वभावोक्तिः २५. व्याजस्तुतिः २६. सहोक्तिः २७. विनोक्तिः २८. परिवृत्तिः २९. भाविकम् ३०. काव्यलिङ्गम् ३१. पर्यायोक्तम् ३२. उदात्तम् ३३. समुच्चयः ३४. पर्यायः ३५. अनुमानम् ३६. परिकरः ३७. व्याजोक्तिः ३८. परिसंख्या ३९. कारणमाला ४०. अन्योन्यम् ४१. उत्तरम् ४२. सूक्ष्मम् ४३. सारः ४४. असङ्गतिः ४५. समाधिः ४६. समम् ४७. विषमम् ४८. अधिकम् ४९. प्रत्यनीकम् ५०. मीलितम् ५१. एकावली ५२. स्मरणम् ५३. भ्रान्तिमान् ५४. प्रतीपम् ५५. सामान्यम् ५६. विशेषः ५७. तद्गुणः ५८. अतद्गुणः ५९. व्याघातः ६०. संसृष्टिः ६१. सङ्करः

१. उपमालङ्कारः

साधर्म्यमुपमा भेदे।

उपमानोपमेययोः भेदे सति साधर्म्यवर्णनमुपमा कथ्यते। अत्र उपमानोपमेययोः एव साधर्म्यं भवति न तु कार्यकारणादीनाम्। अत्र भेदग्रहणमनन्वयव्यवच्छेदाय। उपमानोपमेययोः साधर्म्ये सति भेदस्तु भवत्येव। अत्र उपमालङ्कारे। उपमानोपमेययोः तुलना मुख्या भवेत्। तुलना वा साधर्म्यं द्वयोः भिन्नवस्तुनोः भवेत्। उपमानोपमेययोः एक एव साधारणधर्मः भवेत्। **'हृद्यं साधर्म्यमुपमा'**[२] इति हेमचन्द्राचार्येणोक्तम्। कुवलयानन्दे उक्तं च - **'उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः'**[३]। **'चमत्कारि साध्यमुपमा'**[४] इति वाग्भटेन घोषितम्।

उपमालङ्कारस्य प्रकाराः

मम्मटाचार्यवर्यैः उपमायाः २५ भेदाः प्रदत्ताः। मुख्यप्रकारद्वयम् - पूर्णा लुप्ता च। उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा। एकद्वित्रयाणां वा लोपे लुप्ता। तत्र पूर्णोपमायाः षड् प्रकाराः

पूर्णा

- श्रौती
  - वाक्यगा
  - समासगा
  - तद्धितगा
- आर्थी
  - वाक्यगा
  - समासगा
  - तद्धितगा

"साऽग्रिमा श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा।" इव, यथा, वत् इत्यादयः शब्दाः उपमायां प्रयुज्यन्ते तदा श्रौती उपमा भवति। किञ्च तुल्य, सदृश, सम इत्यादयः सादृश्य प्रतिपादकशब्दाः यत्र प्रयुज्यन्ते तत्र आर्थीउपमा भवति। **(१) श्रौती वाक्यगा पूर्णोपमा** यथेवादिशब्दा यत्र प्रयुक्ताः भवन्ति तथा च उपमानोपमेयसाधारणधर्मोपमा प्रतिपादकानामुपादाने किञ्च समग्रे वाक्ये या भवति सा श्रौती वाक्यगा पूर्णोपमा। यथा-

स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा।।

अत्र **'स्वाधीनपतिका'** उपमानम् **'विजयश्री'** उपमेयम् **'न मुञ्चति'** इति अपरित्यागरूपः साधारणधर्मः **'यथा'** इति उपमावाचकः शब्दश्च। **(२) श्रौती समासगा पूर्णोपमा** इव इत्यादयः शब्दाः एवं उपमायाः चत्वारि अङ्गानि यत्र प्रयुक्तानि भवन्ति तत्र श्रौतीसमासगा पूर्णोपमा उच्यते। यथा -

अत्यायतैर्नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः।
शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं बभार।।

अत्र **'भुजैः'** उपमानम्, **'उपायैः'** उपमेयम्, **'अत्यायतत्वादि'** साधारणो धर्मः, **'इव'** उपमाप्रतिपादकः च। अत्र शौरिभुजः इति पदेन सह **'इव'** इत्यस्य पदस्य नित्यसमासत्वेन समासगाश्रौती उपमा भवति। **(३) श्रौती तद्धितगा पूर्णोपमा 'वत्'** इत्यादयः तद्धितशब्दानां प्रयोगः एवम् उपमायाः सर्वाणि अङ्गानि च यत्र भवन्ति तत्र श्रौती तद्धित गापूर्णोपमा भवति। यथा-

गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत्।
दुरालोकः स समरे निदाघाम्बररत्नवत्॥

अत्र **'गङ्गाभुजङ्गः'** उपमानम्, **'तस्य'** उपमेयमण्, **'गाम्भीर्यगरिमा'** साधारणधर्मः तथा च **'वत्'** इति तद्धितशब्दस्य प्रयोगः अतः श्रौती तद्धितगा पूर्णोपमा। **(४) आर्थी वाक्यगा पूर्णोपमा** उपमायाः चतुरङ्गैः सह तुल्यसमादयः शब्दाः प्रयुज्यन्ते तदा आर्थी वाक्यगा पूर्णोपमा भवति। यथा -

चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहारिकान्ति।
सरसिजमिदमाननं च तस्याः सममिति चेतसि सम्मदं विधत्ते॥

अत्र **'सरसिजम्'** उपमानम्, **'आननम्'** इति उपमेयम्, **'कान्तिमत्व'** साधारणधर्मः, **'समम्'** च उपमावाचकः शब्दः। **(५) आर्थी समासगा पूर्णोपमा** तुल्यादिशब्दैः सह चतुर्णाम् अङ्गानां प्रयोगः भवति तत्र आर्थी समासगा पूर्णोपमा उच्यते। यथा-

अवितथमनोरथपथनेषु प्रगुणगरिमगीतश्रीः।
सुरतरुसदृशः स भवानुभिलषणीयः क्षितीश्वर न कस्य॥

अत्र **'सुरतरु'** इति उपमानम् , **'क्षितीश्वरः'** इति उपमेयम्, **'प्रगुणगरिमगीतश्रीत्वम्' 'अभिलषणीयत्वं'** च साधारणो धर्मः, **'सदृशः'** च उपमावाचकः शब्दः। **(६) आर्थी तद्धितगा पूर्णोपमा** उपमायां तुल्यस्यार्थे वत् इत्यादयः तद्धितप्रत्ययान्ताः उपमायाः चतुरङ्गैः सह प्रयुज्यन्ते तत्र आर्थी तद्धितगा पूर्णोपमा भवति। यथा - अवित... इति पद्ये **'सः'** उपमेयः, **'निदाघाम्बररत्न'** उपमानम्, **'दुरालोकत्वं'** साधारणो धर्मः, **'वत्'** इति च तद्धितोपमाप्रतिपादकः शब्दः। **लुप्तोपमायाः नवदशभेदाः** मम्मटाचार्येण उक्तं यत् - **'एकस्य द्वयास्त्रयाणां'** वा लोपे लुप्ता। साधारणधर्मस्य यत्र लोपो भवति तत्र धर्मलुप्ता भवति। साधारणे प्रसिद्धे सति तस्य लोपः भवति तथापि अत्र उपमा प्रतीयते। श्रौतीतद्धितगौपमायां धर्मलुप्ता न संभवति। अतः धर्मलुप्तायाः पञ्च भेदाः १. वाक्यगता श्रौती धर्मलुप्ता। २. वाक्यगता आर्थीधर्मलुप्ता। ३. समासगा श्रौती धर्मलुप्ता। ४. समासगा आर्थी धर्मलुप्ता। ५. तद्धितगा आर्थी धर्मलुप्ता। **तद्वद्धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः। (१) वाक्यगतश्रौती धर्मलुप्ता** यत्र अथेवादिशब्दैः सह चतुर्षु अङ्गेषु साधारणधर्मस्य लोपो विद्यते तत्र वाक्यगतश्रौती धर्मलुप्ता भवति। यथा -

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः।
करणीयं वचश्चेतः! सत्यं तस्यामृतं यथा।।

अत्र **'परिणामसुरसत्वम्'** इत्यादि तस्य (साधोः) साधारणधर्मः किन्तु प्रसिद्धिवशात् तस्य अग्रहणं कृतम्। **(२) वाक्यगता आर्थी धर्मलुप्ता** समग्रे वाक्ये उपमायां सति तुल्यादिशब्दैः सह साधारणधर्मस्य लोपो भवति तत्र वाक्यगता आर्थी धर्मलुप्ता कथ्यते। यथा-

आकृष्टकरवालोऽसौ सम्पराये परिभ्रमन्।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः।।

अत्र **'यमराजः'** इति उपमानम्, **'राजा'** उपमेयम्। द्वयोः **'अत्यन्तक्रूरत्वम्'** इति प्रसिद्धिवशात् तस्य लोपः। .समः. इति उपमावाचकः शब्दः। **(३) समासगा श्रौती धर्मलुप्ता** - उपमायाम् **'इव'** इत्यादिषु शब्देषु सस्तु साधारणो धर्मो लुप्तो भवति तदा समासगा श्रौती धर्मलुप्ता कथ्यते। यथा -

करवाल इवाचारस्तस्य वागमृतोपमा।
विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे!।।

अत्र **'करवालः'** इति उपमानम् **'आचारः'** च उपमेयम्, **'घातुकत्वम्'** इति साधारणधर्मस्य लोपः **'इव'** इत्यनेन सह समासवशात् समासगा श्रौती धर्मलुप्ता भवति। **(४) समासगा आर्थी धर्मलुप्ता** उपमायां **'तुल्य'** इत्यादीषु शब्देषु सस्तु साधारणो धर्मो यत्र लुप्तो भवति तत्र समासगा-आर्थीधर्मलुप्ता उच्यते। यथा - **'वागमृतोपमा'** इत्यत्र **'वाक्'** उपमेयम्, **'अमृतम्'** उपमानम् तथा च **'माधुर्यं'** तयोः साधारणधर्मः। अत्र **'उपमा'** इति शब्दः सदृशार्थक उपमावाचकश्च। **(५) तद्धितगा आर्थी धर्मलुप्ता** यत्र उपमायां तुल्यस्यार्थे कल्पादिशब्दानां प्रयोगः साधारणधर्मस्य च लोपः भवति तत्र तद्धितगा आर्थी धर्मलुप्ता उच्यते। यथा - **'विषकल्पं मनो वेत्सि ---०'** इत्यत्र **'मनः'** इति उपमेयम्, **'विषम्'** इति उपमानम्, तथा च **'नाशकत्वम्'** इति साधारणधर्मस्य लोपः। अत्र **'कल्प'** उपमावाचकः शब्दः। **उपमानलुप्तायाः भेदद्वयम् 'उपमानानुपादाने वाक्यगाथ समासगा।'** **(६) वाक्यगा उपमानलुप्ता** उपमा समग्रे वाक्ये स्थितेऽपि उपमानस्य लोपः भवति। यथा -

सकलकरणपरविश्रामश्रीवितरणं न सरसकाव्यस्य।
दृश्यतेऽथवा निशम्यते सदृशमंशांशमात्रेण।।

अत्र **'सरसकाव्यम्'** इति उपमेयम्, **'सकलकरणम्'** इति साधारणधर्मः, उपमानस्य च लोपो वर्तते। **'सदृश'** इति उपमावाचकशब्दस्य अन्यैः सह असमासेन वाक्यगा उपमानलुप्ता भवति। **(७) समासगा उपमानलुप्ता** उपमा समासे स्थितेऽपि उपमानस्य लोपः भवति। यथा उपर्युक्तोदाहरणे **'काव्यस्य'** इत्यत्र **'काव्यसमम्'** इति, **'सरसम्' इत्यत्र च 'नूनम्'** इति पाठे एषैव समासगा। **वाचकलुप्तायाः षड् भेदा** उपमावाचकानां लोपेन वाचकलुप्ता उपमा भवति। **"वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि। कर्मकर्त्रोर्णमुलि।"** १. वादेर्लोपे समासगा वाचकलुप्ता। २. वादेर्लोपे कर्मणि क्यच्प्रत्यये वाचकलुप्ता। ३. वादेर्लोपे आधारे क्यच्प्रत्यये वाचकलुप्ता। ४. वादेर्लोपे क्यङ्प्रत्यये सति वाचकलुप्ता। ५. वादेर्लोपे कर्मणि णमुल्प्रत्यये वाचकलुप्ता। ६. वादेर्लोपे कर्तरि णमुल्प्रत्यये वाचकलुप्ता। **(१) समासगा वाचकलुप्ता** एषा उपमा समासे वर्तते तत्र उपमाप्रतिपादकस्य लोपः भवति। यथा-

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता॥

अत्र **'चन्द्रः'** इति उपमेयम्, **'कामिनीगण्ड'** इति उपमानम् **'पाण्डुत्वं'** च साधारणधर्मः। अत्र उपमावाचकस्य लोपः तथा च साधारणधर्मस्य समासेन समासगा वाचकलुप्ता भवति। **(२) कर्मणि क्यच् प्रत्यये वाचकलुप्ता** यदा उपमा कर्मार्थे क्यच् (य) प्रत्यये भवति तथा च उपमावाचकशब्दस्य लोपः भवति तदा एषः भेदः। यथा -

पौरं सुतीयति जनं समरान्तरेऽसावन्तःपुरीयति विचित्रचरित्रचुञ्चुः।
नारीयते समरसीम्नि कृपाणपाणेरालोक्य तस्य चरितानि सपत्नसेना॥

अत्र **'सुतम्'** इति उपमानम्, **'पौरजनम्'** इति उपमेयम्, **'आचारः'** च साधारणधर्मः। **'सुतीयति सुतम् इव आचरति'** इति क्यच् प्रयोगः। **(३) आधारे क्यच् प्रत्यये वाचकलुप्ता** उपमा आधारार्थे क्यच्-तद्धितप्रत्यये तथा च उपमावाचकस्य लोपो भवति तदा एषः भेदः। यथा - **समरान्तरेअन्तःपुरीयति ---०** इत्यत्र **'समरान्तरे'** इति उपमेयः, **'अन्तःपुरम्'** इति उपमानम्, **'आचारः'** च साधारणधर्मः। **'अन्तःपुरे इव आचरति - अन्तःपुरीयति'** मध्ये आधारक्यच्वर्तते अतः क्यच्प्रत्यये वाचकलुप्ता भवति। **(४) क्यङ्प्रत्यये वाचकलुप्ता** उपमा कर्तुः अर्थे क्यङ्प्रत्यये तथा च उपमाप्रतिपादकस्य लोपः भवति तदा एषः भेदः। यथा -**'सपत्नसेना नारीयते---०'** इत्यत्र **'सपत्नसेना'** इति उपमेयः, **'नारी'** इति उपमानम्, **'आचारः'** च साधारणधर्मः। **'नारीयते - नारी इव आचरति'** इत्यत्र

क्यङ्प्रयोगः। **(५) कर्मणि णमुल् प्रत्यये वाचकलुप्ता** उपमा कर्मार्थे-णमुल् प्रत्यये तथा च उपमावाचकस्य लोपः भवति तदा एषः भेदः। यथा -

मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे।

स पुनः पार्थसञ्चारं सञ्चरत्यवनीपतिः॥

अत्र **'निदाघघर्मांशुमिव पश्यन्ति'** इत्यत्र विग्रहे **'उपमाने कर्मणि च (अ. ३/४/४५)'** इति सूत्रेण **'निदाघघर्मांशुम्'** इति कर्म-उपपदे सति **'दृश्'** इति धातोः णमुल् प्रत्ययो भूत्वा **'निदाघघर्मांशुदर्शम्'** इति अव्ययपदं भवति। - **'निदाघघर्मांशुम् इव दृष्ट्वा। णमुल् इव दर्शम् निदाघघर्मांशुम्'** इति कर्मणः उपपदे णमुल् प्रत्ययो भूत्वा भवति। **(६) कर्तरि णमुल्प्रत्यये वाचकलुप्ता** यदि उपमा कर्तुः अर्थे णमुल्प्रत्यये तथा च उपमाप्रतिपादकस्य लोपो भवति तदा एषः भेदः। यथा - **'स पुनः पार्थसंचारं संचरत्यवनीपतिः'** इत्यत्र **'सः'** उपमेयः, **'पार्थः'** इति उपमानम्, **'संचारम्'** इति साधारणो धर्मः तथा च उपमावाचकस्य लोपेन - **'पार्थसंचारम्। पार्थ इव संचारः।'** संचारस्य णमुल् कर्तरि पार्थे निहितं भवति। अतः कर्तरि णमुल् प्रत्यये वाचकलुप्ता।

एतद्द्विलोपे क्विप्समासगा-साधारणधर्मस्य उपमाप्रतिपादकस्य च लोपेन द्विलुप्ता उपमा भवति। (१) क्विप्गता (२) समासगता **(१) क्विप्गता धर्मवाचकलुप्ता उपमा** धर्मवादिनोः लोपः तथा च क्विप्प्रत्यये उपमा भवति तदा एषः भेदः। यथा -

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः।

यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि॥

(२) समासगता धर्मवाचकलुप्ता उपमा धर्मवादिनोः लोपः तथा च समासे उपमा भवति तदा एषः भेदः। यथा -

परिपन्थिमनोराज्यशतैरपि दुराक्रमः।

सम्परायप्रवृत्तोऽसौ राजते राजकुञ्जरः॥

धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते - साधारणधर्मस्य उपमानस्य च लोपे द्विलुप्ता उपमा भवति- (१) वाक्यगा (२) समासगा **(१) वाक्यगा धर्मोपमानलुप्ताः** धर्मोपमानयोः लोपः तथा च समग्रे वाक्ये उपमा भवति तत्र वाक्यगा धर्मोपमानलुप्ता उपमा। यथा -

ढुण्ढुणायमानो मरिष्यसि कण्टककलितानि केतकीवनानि।

मालतीकुसुमसदृशं भ्रमर भ्रमन् न प्राप्स्यसि॥

(२) **समासगा धर्मोपमानलुप्ता** धर्मोपमानयोः लोपः तथा च समासे उपमा भवति तत्र समासगा धर्मोपमानलुप्ता उपमा। यथा- **'दुण्दुणायमानो --०'** इत्यत्र उपमेयप्रतिपादकयोः समासेन एषः भेदः। **(३) क्यच्प्रत्यये वाचकोपमेयलुप्ता क्यचि वाद्युपमेयासे।** अर्थात् वाचकस्य तथा च उपमेयस्य लोपे क्यच्प्रत्यये वाचकोपमेयलुप्ता उपमा भवति। यथा-

अरातिविक्रमालोकविकस्वरविलोचनः।

कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति॥

अत्र **'सहस्रायुधमिव आत्मानमाचरति सहस्रायुधीयति'** इत्यत्र **'उपमानादाचारे'** इति सूत्रेण आचारार्थे क्यच्प्रत्यये वाचकोपमेयलुप्ता उपमा भवति। **(४) त्रयाणां लोपेन समासगा वादिधर्मोपमानलुप्ता त्रिलोपे च समासगा** यदा उपमायां वादिधर्मोपमानानां त्रयाणां लोपः भवति तथा च समासे या उपमा भवति सा समासगा वादिधर्मोपमानलुप्ता उपमा कथ्यते। यथा-

तरुणिमनि कृतावलोकना ललितविलासवितीर्णविग्रहा।

स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मनः॥

अत्र **'सप्तम्युपमान'** इत्यादिना यदा समासलोपौ भवतस्तदेदमुदाहरणम् इति मम्मटेन उक्तम्। एवमेकोनविंशतिर्लुप्ताः पूर्णाभिः सह पञ्चविंशतिः। **मालोपमा** - एकस्य उपमेयस्य नैकैः उपमानैः सह तुलना क्रियते तत्र मालोपमा। यथा-

अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता।

मम्लौ साऽथ विषादेन पद्मिनीव हिमाम्भसा॥

अत्र **'मक्तानि'** इति साधरणो धर्मः - **'राज्यश्री'**, **'मनस्विता'**, **'पद्मिनी'** च इति उपमात्रये भवति। **२. अनन्वयालङ्कारः उपमानोपमेयत्वे एकस्यैवैकवाक्यगे अनन्वयः।** एषः सादृश्यमूलकोऽलङ्कारः। एकस्मिन् वाक्ये एव एकमेव उपमानोपमेयत्वेन भवति तदा अनन्वयनामालङ्कारः भवति। अर्थात् यत् उपमानम् अस्ति तदेव उपमेयम् अपि भवति। अन्योपमानस्य असम्बन्धः एव अनन्वयालङ्कारः। अतः मम्मटः वदति **उपमानान्तरसम्बन्धाभावोऽनन्वयः।** यथा -

न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव।

यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः॥

एतस्मिन् उदाहरणे नितम्बिनी - नायिका नितम्बिनी इव भाति - शोभते। अर्थात् नितम्बिनी एव उपमानोपमेयं भवति। तथैव तस्याः विलासा अपि विलासा इव। तत्रापि विलासा एव उपमानोपमेयं च। अतः अनन्वयालङ्कारः भवति। यथा - राम रावणयोर्युद्धं रामरावणयोरिव। ३. **उपमेयोपमा अलङ्कारः - विपर्यास उपमेयोपमा तयोः।** उपमानस्य उपमेयरूपेण, उपमेयस्य उपमानरूपेण च वर्णनम् उपमेयोपमालङ्कारो भवति। तयोः इत्युक्ते उपमानोपमेययोः। विपर्यासः इत्युक्ते परिवर्तनम्। उपमानोपमेययोः परिवर्तनम् एव उपमेयोपमा। एषः सादृश्यमूलकः अलङ्कारः। यथा -

कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः।

धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य॥

'**कमलेव मतिर्मतिरिव कमला**' इत्यत्र '**कमला**' उपमानं '**मतिः**' उपमेयम्। अनन्ततरं '**मतिः**' इति उपमानं, तथा च '**कमला**' उपमेयम्। अतः एतस्मिन् श्लोके उपमेयोपमालङ्कारः भवति। तथैव शरीरम् क्रान्ति इव, क्रान्तिः शरीरम् इव अस्ति। धरणी धैर्यम् इव धैर्यम् धरणी इव अस्ति। ४. **उत्प्रेक्षालङ्कारः**

सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्।

प्रकृतम् अर्थात् उपमेयम्। वर्ण्यस्य उपमेयस्य (समेन) उपमानेन सह सम्भावना (उत्कटैककोटिक सन्देहः) उत्प्रेक्षालङ्कारः भवति। यथा '**मुखं कमलम् इव सुन्दरम्**' इति वदामः तर्हि उपमा अलङ्कारः भवति किन्तु '**मुखं कमलं मन्ये**' इति वदामः तर्हि उत्प्रेक्षालङ्कारः भवति।

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः।

उत्प्रेक्षावाचकाः शब्दा इव शब्दोऽपि तादृशः॥

मन्ये इत्यादयः शब्दाः यत्र भवन्ति तत्र स्पष्टरूपेण उत्प्रेक्षालङ्कार एव भवति। यथा-

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।

असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥

अत्र व्यापनादि उपमेयम् लेपनादिरूपात् उपमानात् सम्भावितम् (उत्कटैककोटिक सन्देहः) अस्ति। अतः उत्प्रेक्षालङ्कारः अस्ति। '**इव**' उत्प्रेक्षावाचकः वर्तते। ५. **ससन्देहालङ्कारः - ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः।**

'**प्रकृतस्य**' अर्थात् उपमेयस्य '**समेन**' अर्थात् उपमानेन सह समानकोटिकः संशयः

सन्देहालङ्कार उच्यते। अत्र कारिकायां **'प्रकृतस्य समेन'** इति अंशस्य अनुवृत्तिः वर्तते। ससन्देहः अपि द्विप्रकारकः भवति १. एकत्र भेदकथने २. अपरत्र भेदअकथने **१. उपमानोपमेययोः भेदकथनम् :-**

अयं मार्तण्डः किं ? स खलु तुरगैः सप्तभिरितः
कृशानुः किं ? सर्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किं ? साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विधदति विकल्पान् प्रतिभटाः॥

अत्र (राजा) सूर्यः वा ? इति संशयः भवति किन्तु सूर्यः सप्तभिः तुरगैः युक्तः भवति इति भेदकथनम् उक्तम् वर्तते। अत्र व्यतिरेकालङ्कारः न भवति। **२. उपमानोपमेययोः अभेदकथनम्**

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथन्नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥

अत्र उर्वश्याः निर्माणे प्रकृतप्रजापतिरूपोपमेयमध्ये चन्द्रमदनवसन्तादि-नानाकोटिकाप्रकृतानाम् उपमानानां सन्देहः वर्तते अतः सन्देहालङ्कारः भवति। **६. रूपकालङ्कारः तद्रूपकमभेदो यः उपमानोपमेययोः।** यदा उपमानोपमेययोः सादृश्यातिशयवशात् अभेदवर्णनम् भवति तदा रूपकालङ्कारः उच्यते। वस्तुतः अत्र उपमानोपमेये च भिन्नत्वमेव भवति किन्तु अत्यन्तसादृश्यकारणात् अभेदः वर्तते अतः रूपकालङ्कारः भवति। मम्मटः कथयति - यत् **'अतिसाम्यादतपह्नुतभेदयोरभेदः।'** अर्थात् अत्यन्तसादृश्यकारणात् प्रसिद्धौ अनपह्नुतभेदयुक्तौ उपमानोपमेययोः अभेदवर्णनम् रूपकालङ्कारः। यथा- **ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-**

न्यन्तर्द्धानव्यसनरसिका रात्रिकापालिकीयम्।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन॥


एतस्मिन् उदाहरणे **'रात्रिकापालिकीयम्'** इत्यत्र **'रात्रिः'** उपमेयं **'कापालिकी'** इति उपमानम्। **'रात्रि'** इत्यस्य उपरि 'कापालिकी' इति उपमानस्य आरोपः, अतः

समस्तवस्तुविषयरूपकस्य उदाहरणम्। यथा -

विद्वन्मानसहंस ! वैरिकमलासङ्कोचदीप्तद्युते !
दुर्गामार्गणनीललोहित ! समित्सविकारवैश्वानर !
सत्यप्रीतिविधानदक्ष ! विजयप्राग्भावभीम ! प्रभो !
साम्राज्यं वरवीर वत्सरशतं वैरिश्चमुच्चैः क्रियाः ॥

हे राजन् ! भवान् विदुषां मनोरूपिमानससरोवरस्य हंस अस्ति। अत्र मनसि मानससरोवरस्य तथा च राज्ञि (नृपे) हंसस्य आरोपः, अतः रूपकालङ्कारः।

समस्तवस्तुविषयं श्रौता आरोपिता यदा।
श्रौताः अर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत् ॥
साङ्गमेतत् निरङ्गस्तु शुद्धं माला तु पूर्ववत् ॥



७. अपह्नुतिः अलङ्कारः - प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपहनुतिः। प्रकृतस्य (उपमेयस्य) निषेधं कृत्वा अन्यस्य (उपमानस्य) सिद्धिः क्रियते तदा अपह्नुति नामालङ्कारः भवति। अर्थात् उपमेयम् असत्यम् कृत्वा उपमानस्य सत्यरूपेण स्थापना क्रियते तदापह्नुतिः अलङ्कारः भवति। अपह्नुतिः द्विविधा - १. शाब्दी अपह्नुतिः। २. आर्थी अपह्नुतिः। यथा -

१. **अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये !**
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि।

अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥

अत्र उपमेयः **'कलङ्कः'** अस्ति। उपमानम् **'रात्रिरमणी'** अस्ति। कलङ्कस्य निषेधं कृत्वा रात्रिरमण्याः स्थापना कृता अस्ति। अतः अपह्नुतिः अलङ्कारः वर्तते। **'कलङ्को नैवायं'** इति उक्त्वा शब्दतः निषेधः अतः शाब्दी अपह्नुतिः।

२. **'बत सखि ! कियदेतत् पश्य वर स्मरस्य।'**
प्रियविरहकृशेऽस्मिन् रागिलोके तथा हि।
उपवनसहकारोद्भासिभृङ्गच्छलेन
प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् ॥

अत्र आम्रमञ्जरीणां निषेधं कृत्वा कालकूटाङ्कितबाणानां स्थापना कृता अस्ति।(२) अत्र निषेधः शब्दतः न अपि तु अर्थतः आक्षिप्तः भवति अतः आर्थी अपह्नुतिः।

८. अर्थश्लेषालङ्कारः - श्लेषः स वाक्ये एकस्मिन् यत्रानेकार्थता भवेत्।

एकस्मिन् वाक्ये एकार्थप्रतिपादकशब्दानां यत्र अनेकार्थता भवति तत्र अर्थश्लेषालङ्कारः भवति। **'प्रत्यर्थं शब्दा भिद्यन्ते'** इति नियमानुसारं प्रत्येकशब्दः एकार्थी अर्थप्रतिपादकः भवति। यत्र एकस्मात् शब्दात् अनेकार्थता प्रतीयते तत्र वस्तुतः एकः शब्दः न भवति किन्तु समानाकाराणाम् अनेकेषां शब्दानां जतुकाष्ठन्यायेन श्लेषः भवति। यथा-

उदयमयते दिङ्मालिन्यं निराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः।
रचयतितरां स्वैराचारप्रवर्तनकर्तनं
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥

एतस्मिन् श्लोके विभाकरः नाम्न नृपस्य सूर्येण सह तुलनां कृत्वा स्तुतिः क्रियते। **'विभाकर'** शब्दः नृपस्य सूर्यस्य च वाचकः। एतयोः स्थाने समानार्थशब्दं स्थापयामः चेत् श्लेषः न भविष्यति। अतः अत्र एतस्मिन् अंशे शब्दश्लेषः किन्तु शेषभागे तु अर्थश्लेषः तत्र कृते परिवर्तनेऽपि अर्थश्लेषे हानिः न भवति। **९. समासोक्तिः अलङ्कारः परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः।** श्लेषयुक्तविशेषणैः अप्रकृतस्य कथनं भवति तदा समासोक्तिः अलङ्कारः कथ्यते। प्रकृतस्य अर्थप्रदिपादकवाक्येन श्लेषयुक्तैः विशेषणैः न तु विशेष्यपदसामर्थ्येन यत् अप्रकृतस्य अर्थस्य कथनं भवति तत् समासेन प्रकृताप्रकृतयोः कथनं

क्रियते तर्हि समासोक्तिः अलङ्कारः भवति। संक्षेपेण उक्तिः समासोक्तिः। यथा -

लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः।

जयलक्ष्मीस्तव विरहे न खलूज्वला दुर्बला ननु सा॥

एतस्मिन् श्लोके **'जयलक्ष्मी'** इति विशेष्यवाचकः शब्दः प्रकृतम् अस्ति। सः अप्रकृतकान्तारूपस्य अर्थस्य वाचकः न किन्तु श्लेषयुक्तैः विशेषणैः **'जयलक्ष्मी'** इति शब्दः नायिकायाः अपि बोधकः भवति। रूपकालङ्कारे प्रकृतस्य उपरि अप्रकृतविशेष्यस्य आरोपः भवति। समासोक्तौ प्रकृतव्यवहारे एव अप्रकृतव्यवहारस्य आरोपः भवति। १०. **निदर्शना अलङ्कारः - अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः।** यत्र वस्तूनाम् असम्भवः अथवा अनुपपद्यमानः सम्बन्धः उपमायां पर्यवसितः (परिकल्पकः) भवति तत्र निदर्शना - अलङ्कारः भवति। निदर्शनं दृष्टान्तकरणम्, उपमा-परिकल्पकः अतः निदर्शना इति संज्ञा सार्थकतां प्राप्नोति। निदर्शनालङ्कारस्य प्रकारत्रयम् - १. वाक्यार्थनिदर्शना। २. पदार्थनिदर्शना। ३. मालानिदर्शना। यथा -

१. **क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।**

तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

एतस्मिन् श्लोके पूर्वार्थरूपम् उत्तरार्धरूपं च वाक्यार्थानाम् उपमानोपमेयभावः पर्यवसितः भवति अतः वाक्यार्थनिदर्शनालङ्कारः। अत्र उडुयनेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णनमिव उपमायां पर्यवसति।

२. **उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।**

वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्॥

एतस्मिन् श्लोके वारणेन्द्रलीलारूपपदार्थस्य रैवतकपर्वतेन सह सम्बन्धः अनुपपद्यमानः भूत्वा उपमायां पर्यवसितः भवति अतः पदार्थनिदर्शना।

३. दोर्भ्यां तितीर्षति तरङ्गवतीभुजङ्गमादातुमिच्छति करे हरिणाङ्कबिम्बम्।

मेरुं लिलङ्घयिषति ध्रुवमेष देव ! यस्ते गुणान् गदितुमुद्यममादधाति॥

अत्र भो देव! यस्तव गुणानादातुमुद्यममादधाति एषः पुरुषः दोर्भ्यां तरङ्गवतीभुजङ्गं तितीर्षति करे, हरिणाङ्कबिम्बमादातुमिच्छति। भो देव! यस्तव गुणानादातुमुद्यममादधाति मेरुं लिलङ्घयिषति। अत्रापि अनुपपद्यमानसम्बन्धः उपमानपर्यवसितत्वात् निदर्शनम्। मालायोगात् मालानिदर्शनालङ्कारः। ११. **अप्रस्तुतप्रशंसालङ्कारः अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया।** अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा।

प्रस्तुत अर्थस्य प्रतीतिरूपस्य (प्रतिपादकस्य) अप्रस्तुतार्थस्य प्रशंसा (वर्णनं) यत्र भवति सा अप्रस्तुतप्रशंसा। अप्राकरणिकार्थस्य अभिधानेन प्राकरणिकार्थस्य आक्षेपः एव अप्रस्तुतप्रशंसा।

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा॥

१. कार्ये प्रस्तुते सति कारणस्य। २. कारणे प्रस्तुते सति कार्यस्य । ३. सामान्ये प्रस्तुते सति विशेषस्य। ४. विशेषे प्रस्तुते सति सामान्यस्य। ५. तुल्ये प्रस्तुते सति तुल्यस्य। यथा -

याताः किन्न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशाऽसि कथयत्येवं सवाष्पे मयि।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः॥

अत्र नायिकायाः हसितेन भाविमरणोत्साहः सूचितः। यदि मां त्वक्त्वा क्वचिद् यास्यति तदाहं मरिष्ये इति सूचितम्। प्रस्थानद्वारा कार्यप्रस्तावे प्रस्थानस्य निर्णीतत्वात् कारणं मरणोपक्रमसूचनारूपम् अभिहितम्। कुत्रचित् वाच्यार्थस्य उपरि प्रतीयमानार्थस्य आक्षेपः भवति। यथा -

कस्त्वं भोः ? कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायाऽपि परोपकारकरणे मार्गस्थितस्यापि मे॥

शाखोटकस्य उपरि निम्नजात्यादिरूपप्रतीयमानार्थस्य आक्षेपः अतः अध्यारोपमूलिकाप्रस्तुतप्रशंसा भवति। अत्र अचेतनेन सह प्रश्नोत्तरयोरसम्भवात् वाच्यस्यासम्भावात् वाच्यस्यासम्भवः।

१२. अतिशयोक्तिः अलङ्कारः

निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्॥
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः।
विज्ञेयाऽतिशयोक्तिः सा.......... ॥

प्रकृतस्य (उपमेयस्य) उपमानद्वारा निगरणं कृत्वा अभेदकथनरूपम् - अध्यवसानम् भवति तदा प्रथमातिशयोक्तिः भवति। प्रस्तुतार्थस्य अन्यरूपेण वर्णनं भवति तदा द्वितीयातिशयोक्तिः। **'यदि'** इत्यस्य समानार्थकशब्दद्वारा कल्पना क्रियते तदा तृतीयातिशयोक्तिः। कार्यकारणयोः पौर्वापर्यविपर्ययः भवति तदा चतुर्थी अतिशयोक्तिः भवति। यथा -

१. **कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम्।**
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम्॥

अत्र मुखादेः कमलादिरूपतया अध्यवसाने चायं प्रथमो भेदः। "**कमलमनम्भसि इत्यादियोगे तु असम्बन्धे सम्बन्धरूपातिशयोक्तिः। तथा विरोधालङ्कारोऽपि।**" इति माणिक्यचन्द्रः।

२. **अन्यत् सौकुमार्यमन्यैव च कापि वर्तनच्छाया।**
श्यामा सामान्यप्रजापतेः रेखैव च न भवति॥

अत्र नायिकायाः सौकुमार्यम् अन्यदेव इति उक्तौ अस्य सौकुमार्यस्य सौकुमार्योत्तरादतिशयः प्रतीयते। एषा द्वितीया अतिशयोक्तिः।

३. **राकायामकलङ्कं चेदमृतांशोर्भवेद् वपुः।**
तस्या मुखं तदा साम्यपराभवमवाप्नुयात्॥

एतस्मिन् श्लोके **'यदि'** शब्दस्य समानार्थकः चेत् इति शब्देन असम्भवार्थस्य कल्पना कृता अस्ति अतः अतिशयोक्ति अलङ्कारः भवति।

४. **हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन।**
चरमं रमणीवल्लभ ! लोचनविषयं त्वया भजता॥

अत्र आदौ प्रथमं मालत्याः हृदयं कुसुमचापबाणेन अधिष्ठितम्। भो रमणीवल्लभ ! चरमं पश्चाल्लोचनविषयं भजता त्वया अधिष्ठितम्। अत्र स्मराधिष्ठानं कार्यं पूर्वमेव जातम्। नायकाधिष्ठानं तु स्मराधिष्ठानकारणं पश्चादिति कार्यकारणयोः पौर्वापर्यविपर्ययः।

१३. प्रतिवस्तूपमा अलङ्कारः - प्रतिवस्तूपमा तु सा। सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः। यत्र एकः साधारणधर्मः वाक्यद्वये वारद्वयं वभिन्नैः शब्दैः उक्तः भवति तत्र प्रतिवस्तूपमालङ्कारः। प्रतिवस्तूपमालङ्कारोऽपि द्विविधः केवलरूपः मालारूपः च। यथा -

देवीभावं गमिता परिवारपदं कथं भजत्वेषा।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम्।।

एतस्मिन् उदाहरणे उत्तरार्धस्य वाक्यार्थः उपमानरूपः तथा च पूर्वार्धस्य वाक्यार्थ उपमेयरूपः वर्तते। अत्र एकम्; अनौचित्यरूपः साधारणधर्मः वाक्यद्वये भिन्नैः भिन्नैः शब्दैः कथितः पूर्वार्धे **'कथं भजतु'** इति पदेन तथा उत्तरार्धे 'न खलु परिभोगयोग्यम्' इति पदेन च।

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किन्ततः।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता।।

अत्र **'प्रकृतिरेव सतामविषादिता'** उपमेयरूपः तथा च शेषे चरणत्रयेऽपि यः वाक्यार्थः सः उपमानरूपः। **'स्वाभाविकधर्मदर्शनं विस्मयकारकं न भवति'** इति साधारणधर्मः भिन्नैः शब्दैः उक्तः अतः प्रतिवस्तूपमालङ्कारः।

१४. दृष्टान्तालङ्कारः - दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्।

उपमानस्य उपमेयस्य च तयोः विशेषणानां वा साधारणधर्मादीनां भिन्नत्वे सति औपम्यप्रतिपादनार्थरूप उपमानवाक्ये उपमेयवाक्ये च पृथक् - उपादानरूपः (बिम्बप्रतिबिम्बभावः) भवति तदा दृष्टान्तालङ्कारः। दृष्टान्तोऽपि साधर्म्येण वैधर्म्येण वा भवति। यथा -

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम्।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः।।

एतस्मिन् श्लोके नायकेन सह चन्द्रस्य, नायिकया सह कुमुद्वत्याः, मनसा सह कुसुमस्य, मनोभवसन्तप्तत्वेन सह सूर्यसन्तप्तत्वस्य, निर्वाणेन सह विकासस्य बिम्ब-प्रतिबिम्बभावः भवति अतः दृष्टान्तालङ्कारः भवति। **१५. दीपकालङ्कारः**

सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम्।।

प्रतिवस्तूपमादृष्टान्तनिदर्शनादिवत् दीपकालङ्कारोऽपि (गम्य-) औपम्याश्रितः। यदि (- प्रकृतस्य उपमेयस्य प्राकरणिकस्य वा) तथैव अप्रकृतस्य उपमानस्य अप्राकरणिकस्य वा क्रियादिरूपधर्माणाम् एकवारं हि ग्रहणं भवति अथवा बह्वीषु क्रियासु एकस्य कारणस्य ग्रहणं भवति तर्हि दीपकालङ्कारः। दीपकारलङ्कारः त्रिविधः - क्रियादीपकम्, कारकदीपकम् मालादीपकम् च।

कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम्।

कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम्॥

एतस्मिन् श्लोके '**स्पृश्यन्ते**' इति एकं क्रियापदं वर्तते। तेन सह धन-फणम
स्तनादिकारकाणां सम्बन्धः। अतः क्रियादीपकम्।

स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक्।

अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने॥

एतस्मिन् श्लोके स्विद्यत्यादि अष्ट-क्रियानां '**नवपरिणया वधू**' इति कर्तृपदे
ध अतः कारकदीपकम्। पूर्वेण पूर्वेण वस्तुना उत्तरमुत्तरं चेदुपक्रियते तन्मालादीप
-

संग्रामाङ्गणमागतेन भवता चापे समारोपिते

देवाकर्णय येन येन सहसा यद्यत्समासादितम्।

कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं

तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम्॥

अत्र कोदण्डाद्यैः शरादीनां क्रमेण उत्कर्षः विहित एकावली तु पूर्वस्य उत्तर
हितुत्वे स्यात् इति भेदः। **१६. तुल्ययोगितालङ्कारः - नियतानां सकृद्ध**
तुल्ययोगिता। नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा। यदा निय
केवलप्रकृतानाम् अप्रकृतानां वा एकेन धर्मेण सह सम्बन्धः भवति तदा तुल्ययोगिता
। -प्राकरणिकानाम् अप्राकरणिकानां वा एकेन धर्मेण सह सम
ोगितालङ्कारः। यथा-

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः।

आवेदयति नितान्तं क्षेत्रियरोगं सखि! हृदन्तः॥

अत्र विरहानुभावरूपमुखस्य पाण्डुता क्षमता च, हृदयस्य सरसता, श
्यम् इत्यादिप्रकृतानाम् 'आवेदयति' इति क्रियया (धर्मेण) सह सम्बन्ध
ोगितालङ्कारः।

कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का।

अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य॥

अत्र कुमुदादीनि सर्वाणि अप्रकृतानि। दृशोः इत्युक्ते मुखस्य वर्ण्यत्वात् प्रकृतत्वम्। 'का' इति निन्दारूपः पूर्वार्धे प्रतिहतत्वरूपश्च उत्तरार्धे सकृद्धर्मः निबद्धः। अत्र अप्रकृतेषु पदार्थेषु एकधर्मानुगतेषु वर्ण्यमाणेषु किंचित् साम्यं ज्ञेयम्। अर्थात् पूर्वार्द्धे कामिनीनयनोपमानत्वेन, अप्रकृतानामेव कुमुदादीनां धर्मतया कापदव्यङ्ग्योऽधिक्षेपः उपात्तः। उत्तरार्धे आननोपमानत्वेन, अप्रकृतानामेवामृतादीनां धर्मतया प्रतिहतत्वं चैको धर्मः उपात्तः इति उभयत्र तुल्ययोगितालङ्कारः। **१७. व्यतिरेकालङ्कारः - उपमानाद् यदन्यस्य व्यतिरेकः स एव सः।** उपमानाद् अन्यस्य इत्युक्ते उपमेयस्य आधिक्यरूपवर्णनेन व्यतिरेकालङ्कारः। गुणविशेषकृत उत्कर्षः स एव व्यतिरेकालङ्कारः। विशेषेण अतिरेको व्यतिरेक इति।

क्षीणः क्षीणोऽपि शशीभूयो भूयोऽभिवर्धते सत्यम्।
विरम प्रसीद सुन्दरि ! यौवनमनिवर्ति यातं तु॥

एतस्मिन् श्लोके चन्द्रात् यौवनस्य आधिक्यरूपवर्णनम् अस्ति अतः व्यतिरेकालङ्कारः। व्यतिरेकालङ्कारस्य चतुर्विंशतिः भेदाः मम्मटाचार्येण दर्शिताः। यथा - १. उपमेयगतमुत्कर्षहेतोः उपमानगतमपकर्षहेतोः च उक्तत्वम्। २. उपमेयगतमुत्कर्षहेतोः अनुक्तत्वम्। ३. उपमानगतमपकर्षहेतोः अनुक्तत्वम्। ४. द्वाभ्यां साकं अनुक्तत्वम्। एतद् चतुष्टयम् उपमानोपमेयभावेन शब्देन अर्थेन वा आक्षिप्तं भवति अतः आहत्य द्वादशभेदाः भवन्ति। द्वादशानामपि श्लेषेण चतुर्विंशतिर्भेदाः।

हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते।
शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत् त्रिरष्ट तत्।

१८. आक्षेपालङ्कारः

निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः॥

विशेषाभिधानाय वक्तुमिष्टस्य यदा निषेधः क्रियते सः आक्षेपः। आक्षेपो द्विधा भवति (१) वक्ष्यमाणः (२) उक्तविषयः

१. ए एहि किमपि कस्या अपि कृते निष्कृप ! भणामि अलमथवा।
अविचारितकार्यारम्भकारिणी म्रियतां न भणिष्यामि॥

अत्र वियोगिनी - नायिकायाः सखी नायकस्य समीपे सन्देशं स्वीकृत्य आगता अस्ति। किन्तु संदेशात् पूर्वं सा तस्याः निषेधं करोति। - म्रियतां न त्वां भणिष्यामि

मरणमपि श्लाघनीयं तस्याः। अतः वक्ष्यमाणविषयकः आक्षेपः।

२. **ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः**
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः।
अन्तर्मानसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे॥

अत्र ज्योत्स्नादीनां प्रभावम् उक्त्वा अनन्तरं निषेधः कृतः। अतः उक्तविषयः आक्षेपः। विश्वनाथेनापि उक्तम् -

"वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये।
निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा॥"

उद्भटेनापि उक्तम् -

"प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया।
आक्षेप इति तं सन्तः शंसन्ति कवयः सदा॥"

१९. विभावनालङ्कारः

क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना।

एषः विरोधमूलकः अलङ्कारः। क्रिया-शब्दः कारणस्य बोधकः। हेतुरूपकारणस्य निषेधे अभावे वा सति फलव्यक्तिः भवति तदा विभावनालङ्कारः। **'हेतुरूपक्रियाया निषेधेऽपि तत्कालप्रकाशनं विभावना'**। यथा -

कुसुमितलताभिरहताऽप्यधत्त रुजमलिकुलैरदष्टापि।
परिवर्तते स्म नलिनीलहरीभिरलोलिताप्यघूर्णत सा॥

एतस्मिन् श्लोके कुसुमितलताभिः अलिकुलैः नलिनीलहरीभिः च कारणानि सन्ति। तेषां कारणानां निषेधः तथापि फलोत्पत्तिः भवति अतः विभावनालङ्कारः। अत्र लताहननं पीडाहेतुः भ्रमरदंशः परिवर्तनहेतुः, तरङ्गसम्बन्धो घूर्णनहेतुः। अत्र तेषां हेतूनाम् अभावेऽपि तत्कार्यस्य पीडादिरूपस्य कथनम् अतः विभावनालङ्कारः। **२०. विशेषोक्तिः अलङ्कारः विशेषोक्तिरखण्डेषु कारणेषु फलावचः।** एष अपि विरोधमूलकोऽलङ्कारः। अनेकेषु कारणेषु अपि कार्यस्य अकथनं भवति तदा विशेषोक्तिः अलङ्कारः। मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः। विशेषोक्तिरपि त्रिधा - अनुक्तनिमित्ता उक्तनिमित्ता अचिन्त्यनिमित्ता च। यथा -

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा॥

एतस्मिन् उदाहरणे निद्रानिवृत्तिः, सूर्यस्योदयः, सखीनां द्वारपदम् आगमनम् इत्यादि कारणानि तथापि आलिङ्गनपरित्यागरूपः कार्यस्य अभावः अतः विशेषोक्तिः। सा च निमित्तस्याऽनुरागातिशयस्य अनुक्तेः अनुक्तनिमित्ता।

उक्तनिमित्ता यथा -

कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे॥

अत्र शरीरदाहः शक्तिध्वंसे कारणम् सत्यपि तस्मिन् कारणे शक्तिध्वंसरूपकार्याभावकथनमिति विशेषोक्तिः। सा च निमित्तस्यावार्यवीर्यत्वस्य कथनाद् उक्तनिमित्ता। अचिन्त्यनिमित्ता यथा -

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः।
हरतापि तनुं यस्य शम्भुना न बलं हृतम्॥

अत्र तनुहरणं बलहरणे कारणम्, सत्यपि तस्मिन् कारणे बलहरणरूप-कार्यस्याभावकथनमिति विशेषोक्ति। सा च तनुं हरता कथं बलं न हृतमित्यत्र हेतुर्विशिष्य वक्तुं न शक्यते, शास्त्रैकगम्यत्वाद् इति अचिन्त्यनिमित्ता। **२१. यथासंख्यम् अलङ्कारः**

यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः।

क्रमेण उक्तानां पदार्थानां तेनैव क्रमेण समन्वयो भवति। तदा यथासंख्यम् अलङ्कारः भवति। यथा-

एकस्त्रिधा वससि चेतसि चित्रमत्र,
देव ! द्विषां च विदुषां च मृगीदृशां च।
तापं च सम्मदरसं च रतिं च पुष्णन्
शौर्योष्मणा च विनयेन च लीलया च॥

अत्र द्वितीये चरणे उक्तानां **'द्विषाम्'**, **'विदुषाम्'**, **'मृगीदृशाम्'** च इति त्रयाणां तृतीये चरणे - **'तापम्'**, **'सम्मदरसम्'**, **'रतिम्'**, च इति त्रिभिः सह, तथा च चतुर्थे चरणे **'शौर्योष्मणा'**, **'विनयेन'**, **'लीलया'**, च इति त्रिभिः पदैः सह क्रमेण अन्वयो भवति। अतः यथासख्यम् - अलङ्कारः।

२२. अर्थान्तरन्यासालङ्कारः

गम्य - औपम्याश्रितालङ्कारोऽयम्। अनुपपद्यमानतया सम्भाव्यमानस्यार्थस्य उपपादनार्थं यद् अर्थान्तरं न्यस्यते सोऽर्थान्तरन्यागासः।

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥

यत्र साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण समर्थ्यते विशेषो वा सामान्येन सोऽर्थान्तरन्यासः। अतः अर्थान्तरन्यासः चतुर्विधः। १. विशेषेण सामान्यस्य साधर्म्येण समर्थनम् - यथा

निजदोषावृत्तमनसामतिसुन्दरमेव भाति विपरीतम्।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्॥

'निजदोषावृत्तमनसामतिसुन्दरमेव भाति विपरीतम्' इति सामान्यं **'पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् पश्यति'** इति विशेषेण समर्थ्यते अतः अर्थान्तरन्यासः। २. सामान्येन विशेषस्य साधर्म्येण समर्थनम् - यथा-

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः।
तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का क्व नासि शुभप्रदः॥

अत्र चन्द्रहाससमयेऽपि निःशङ्कायाः प्रियगृहगमनं विशेषरूपं समर्थ्यते। **'क्व नासि शुभप्रदः'** इति सामान्यं चन्द्रकीर्तिसाधर्म्येण समर्थकम्। ३. विशेषेण सामान्यस्य वैधर्म्येण समर्थनम् - यथा -

गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गलिः॥

अत्र धुर्यः अर्थात् भारवहनसमर्थः।[५] गलिः अर्थात् पतनशीलः[६] (कार्याकुशलो वृषः)। **'धुर्यः'** इत्यादिनाऽभिहितं सामान्यं **'गौर्गलिः'** इति विशेषेण समर्थ्यते, अतः अर्थान्तरन्यासोऽलङ्कारोऽयम्। ४. सामान्येन विशेषस्य वैधर्म्येण समर्थनम् यथा -

अहो हि मे वह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम्।
त एव धन्याः सुहृदः पराभवं जगत्यदृष्टैव हि ये क्षयं गताः॥

अत्र **'ते धन्याः'** इति सामान्येन **'अहमधन्यः'** इति वैधर्म्यद्वारा स्वायुरपराधरूपो विशेषः समर्थ्यते, अतः अर्थान्तरन्यासोऽयम्। २३. **विरोधालङ्कारः - विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः**। वस्तुतः यत्र विरोधः न भवति तत्र विरुद्धत्वेन वर्णनं क्रियते तदा विरोधालङ्कारः भवति। विरुद्धार्थप्रतिपादकस्य पदादेः, अर्थान्तरपरत्वादिना वस्तुतः विरोधाभावेऽपि आपाततो विरोधप्रतीतिः विरोधालङ्कारः। वस्तुवृत्तेनाविरोधेऽपि विरुद्धयोरिव यदभिधानं सः विरोधः।

जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद् गुणस्त्रिभिः।
क्रिया द्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश॥

एवं दशप्रकाराः भवन्ति। यथा -

अभिनवनलिनीकिसलयमृणालवलयादि दवदहनराशिः।
सुभगकुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोगविपाते॥

अत्र नलिनीत्वकिसलयत्वादिजातीनां दवदहनत्वजात्या सह विरोधः स च नलिन्यादिषु विरहोद्दीपकतया दवदहनत्वोपचारेण परिहृत इत्याभासरूप इति विरोधालङ्कारः।

पेशलमपि खलवचनं दहतितरां मानसं सतत्त्वविदाम्।
परुषमपि सुजनवाक्यं मलयजरसवत् प्रमोदयति॥

अत्र पेशलत्वस्य दहति इति क्रियया सह तथैव परुषत्वस्य प्रमोदेन सह विरोधः अतः विरोधालङ्कारः। अत्र दिङ्मात्रमुदाह्रियते। २४. **स्वभावोक्तिः अलङ्कारः- स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्**। बालकादीनां स्वक्रियारूपवर्ण-संस्थानादीनां वर्णनं स्वभावोक्तिः। कस्यचिद् वस्तुनः असाधारणधर्मवर्णनं स्वभावोक्त्यलङ्कारः।

पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण।

अत्र शयनादुत्थितस्य अश्वस्य स्वाभाविकक्रियायाः वर्णनम् अतः स्वभावोक्तिः।

२५. **व्याजस्तुतिः अलङ्कारः - व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा।**

मुखे अर्थात् दर्शने निन्दा स्तुतिर्वा भवति किन्तु तस्याः पर्यवसानम् अन्यथा भवति तदा व्याजस्तुतिः। - यदा निन्दा भवति तदा स्तुतिमध्ये तस्याः पर्यवसानम्।- यदा स्तुतिर्भवति तदा निन्दामध्ये तस्याः पर्यवसानम्। व्याजरूपा व्याजेन वा स्तुतिः। यथा -

हित्वा त्वामुपरोधवन्ध्यमनसां मन्ये न मौलिः परो
लज्जावर्जनमन्तरेण न रमामन्यत्र संदृश्यते।
यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रितायाः श्रियः
प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः॥

अत्र प्रारम्भे राज्ञः निन्दा वर्तते तस्याः पर्यवसानं स्तुतौ भवति अतः व्याजस्तुतिः अलङ्कारः।

हे हेलाजितबोधिसत्त्व ! वचसां किं विस्तरैस्तोयधे !
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः॥

अत्र समुद्रस्य स्तुतिव्याजेन निन्दाप्रतिपादनाच्चमत्काराऽतिशयः इति व्याजरूपा स्तुतिः।

२६. सहोक्तिः अलङ्कारः -सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्।[1]

एकार्थवाचके सति यस्य सहार्थस्य सामर्थ्यात् यत् उभयस्याप्यवगमकं भवति सा सहोक्तिः। यथा-

सह दिवसनिशाभिः दीर्घाः श्वासदण्डाः
सह मणिवलयैर्बाष्पधारा गलन्ति।
तव सुभग ! वियोगे तस्या उद्विग्नायाः
सह च तनुलतया दुर्बला जीविताशा॥

अत्र **'दीर्घा'** इति शब्दः **'श्वासदण्डाः'** इति शब्देन सह योजितः। सः सहबलात् दिवसनिशाभिः सह युज्यते। तथैव **'गलन्ति'** इति शब्दः **'बाष्पधाराः'** इत्यनेन सह मणिवलयैः सह योज्यते। **'दुर्बला'** इति शब्दोऽपि जीविताशया सह सहबलात् तनुलतया सह योज्यते। अतः सहोक्तिः- अलङ्कारः। दण्ड्याचार्येण उक्तम् - **'सहोक्तिः सहमात्रस्य कथनं गुणकर्मणाम्'** **२७. विनोक्तिः अलङ्कारः विनोक्तिः सा विनाऽन्येन यत्रान्यः सन्न नेतरः।** एकेन वस्तुना विना द्वितीयवस्तु शोभनम् अशोभनं वा दृश्यते तत्र विनोक्तिः अलङ्कारः। एवं विनोक्तिस्तु द्विधा- **क्वचिदशोभनः क्वचिच्छोभनः।** यथा -

१. **अरुचिर्निशया विना शशी शशिना सापि विना महत्तमः।**
अभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः॥

अत्र निशया विना शशी तथा च शशिना विना निशा एवम् अशोभनीयतायाः वर्णनम् अस्ति। अतः अशोभनः विनोक्तिः अलङ्कारः।

२. **मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः।**
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः॥

अत्र मृगलोचनया दुष्टमित्रेण च विना राजपुत्रस्य शोभायाः वर्णनम् अस्ति। अतः शोभनः विनोक्तिः-अलङ्कारः। जगन्नाथेन उक्तम् - **'विनार्थसंबंधेनेयं विनोक्तिः।'** विश्वनाथेनापि चोक्तम् यत्- **'विनोक्तिर्यद्विनान्येन नासाध्वन्यदसाधुर्वा।'** २८. **परिवृत्तिः अलङ्कारः - 'परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः।'** पदार्थानां समासमैः - उत्तमानुत्तमैः सह विनिमयः भवति तदा परिवृत्ति - अलङ्कारः। अत्र **'परिवृत्तिः'** तथा च विनिमयः इति द्वौ शब्दौ समानार्थकौ। किन्तु **'परिवृत्तिः'** इति लक्ष्यपदं **'विनिमयः'** इति च लक्षणपदम्। यथा-

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्त्वा श्रयति भृशमामोदमसमम्।
लतास्त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम्॥

अत्र प्रथमेऽर्धे समेन समस्य द्वितीये उत्तमेन न्यूनस्य विनिमयः। **'लास्यं'** लतायाः कृते तथा च **'आमोदं'** वायोः कृते उपादेयः। अतः समेन समस्य विनिमयो भवति। उत्तरार्द्धे दृष्टिः उत्तमा प्रिया च। तया सह आधिव्याधि - इत्यादीनां न्यूनादीनां विनिमयः अतः उत्तमेन न्यूनस्य विनिमयः। **'अर्थानां यो विनिमयः परिवृत्तिस्तु सा यथा'** इति दण्ड्याचार्यः। २९. **भाविकालङ्कारः प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः तद्भाविकम्।** भूतकालस्य भाविनकालस्य च वस्तूनि कविना प्रत्यक्षीक्रियन्ते तत्र भाविकालङ्कारः। अर्थात् अतीतानागतयोः प्रत्यक्षवत् दर्शनम्। यथा-

आसीदञ्जनमत्रेति पश्यामि तव लोचने।
भाविभूषणसम्भारां साक्षात्कुर्वे तवाकृतिम्॥

अत्र **'अञ्जनम् आसीत्'** इति भूतकालस्य **'तवाकृतिं साक्षात्कुर्वे'** इति च भविष्यकालस्य नायकः भावनावशात् दर्शनं करोति। भामहेनापि उक्तम् -

'भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम्।
प्रत्यक्षा इव दृश्यन्ते यत्रार्था भूतभाविनः ।।
चित्रोदात्ताद्भूतार्थत्वं कथायां स्वमिनीयता।
शब्दानाकुलता चैव तस्य हेतुं प्रचक्षते ।।'

३०. **काव्यलिङ्गमलङ्कारः-काव्यलिङ्गं हेतोर्वाक्यपदार्थता।** हेतोः वाक्यार्थरूपेण पदार्थरूपेण वा कथनं भवति तदा काव्यलिङ्गालङ्कारः। तत्रापि हेतोर्वाक्यार्थता, अनेकपदार्थता एकपदार्थता चेति त्रिविधं काव्यलिङ्गम्। यथा -

**वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे ! न प्रायः क्वचिदपि भवन्तं प्रणतवान्।
नमन्मुक्तः सम्प्रत्यहमतनुरग्रेऽप्यनतिभाक्
महेश ! क्षन्तव्यं तदिदमपराधद्वयमपि ।।**

एतस्मिन् उदाहरणे '**पुरा जन्मनि भवन्तं न प्रणतवान्**' तथा '**अग्रेऽप्यनतिभाक्**' इति वाक्यार्थयोः अपराधद्वयस्य हेतोः कथनम् अतः काव्यलिङ्गालङ्कारः।

**प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत्।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ।।**

अत्र '**वपुषि शस्त्रमुपक्षिपतः**' इति प्रातिपदिकानां क्रियासाकाङ्क्षतया वाक्यभावमनाप्तानाम् अनेकपदानामर्थः शस्त्रोपक्षेपरूपो भुजपाते हेतुरिति काव्यलिङ्गम्।

**भस्मोद्धूलन ! भद्रमस्तु भवते रुद्राक्षमाले ! शुभं
हा सोपानपरम्परां गिरिसुताकान्तालयालङ्कृतिम्।
अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-
लोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ।।**

अत्र महामोहत्वे सुखालोकच्छेदकत्वं समस्तपदार्थो हेतुः, इत्येकपदार्थरूपः हेतुरिति काव्यलिङ्गमलङ्कारः। ३१. **पर्यायोक्तिः अलङ्कारः-पर्यायोक्तं विना वाच्यवाच्यकत्वेन यद्वचः।** वाच्यवाचकसम्बंधं विना यदा विधानं क्रियते तदा पर्यायोक्तिः अलङ्कारः भवति। अत्र वाच्य-वाचकभावात् भिन्नव्यञ्जनाव्यापारेण वाच्यार्थस्य प्रकारान्तरेण प्रतिपादनं

क्रियते। यथा-

यं प्रेक्ष्य चिररूढाऽपि निवासप्रीतिरुज्झिता।

मदेनैरावणमुखे मानेन हृदये हरेः॥

अत्र ऐरावणशक्रौ मदमानमुक्तौ इति व्यङ्ग्यार्थः शब्दद्वारा प्रकाशितः। अत्र हयग्रीवं दृष्ट्वा भेदेन ऐरावतमुखे मानेन हरेः हृदये प्रीतिरुज्झिता इति प्रकारान्तरेण व्यञ्जनया उक्तमस्ति अतः पर्यायोक्तम्। जगन्नाथेन उक्तम् -

'विवक्षितस्य अर्थस्य भङ्ग्यन्तरेण प्रतिपादनं पर्यायोक्तम्।'

'पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते।

वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मना॥'

३२. उदात्तालङ्कारः- उदात्तं वस्तुनः सम्पत् महतां चोपलक्षणम्। वस्तुनः समृद्धमहतां चोपलक्षणम् उदात्तालङ्कारः। अत्र सम्पत् इत्युक्ते समृद्धियोगः। उपलक्षणम् इत्युक्ते अङ्गभावः - गुणभावः। यथा-

१. **मुक्ताः केलिविसूत्रहारगलिताः सम्मार्जनीभिर्हृताः**

प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः।

दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुका

यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम्॥

अत्र राज्ञः भोजस्य स्तुतिः वर्तते। तत्र विद्वद्भवनानां सम्पतेः वर्णनं कृतमस्ति। अतः उदात्तालङ्कारः।

२. **तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी।**

निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः॥

अत्र दण्डकारण्यस्य उत्कर्षाय रामस्य अङ्गरूपेण उपस्थितिः कृता। अत्र वीररसः अपि अङ्गत्वात् अस्ति, अतः उदात्तालङ्कारः। **३३. समुच्चयालङ्कारः - 'तत्सिद्धिहेतावेकस्मिन् यत्रान्यत् तत्करं भवेत्। समुच्चयोऽसौ।'** कस्यापि एकस्य प्रस्तुतस्य कार्यस्य स्थिते कारणेऽपि अपराणि साधकान्तराणि यत्र सम्भवन्ति तत्र समुच्चयालङ्कारः। अत्र - प्रस्तुतकार्यस्य उल्लेखो भवति। - कार्यसिद्धिहेतुः अपि भवति। - तत्कार्यं कर्तुम् अपराणि कारणानि अपि भवन्ति।- हेतूनां समुच्चयेन कार्यसिद्धिः सरला भवति। एवं हेतूनां समुच्चयेन यत् वैचित्र्यम् उद्भवति तत्

समुच्चयालङ्कारः। यथा -

१. **दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं**
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम्।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत् कालः कृतान्तोऽक्षमो
नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः।।

अत्र नायिकायाः विरहवेदना प्रदर्शिता अस्ति। तत्र विरहवेदनाम् असह्यां कारयितुं कामदेवस्य बाणाः पर्याप्ताः तथापि विरहवेदनायाः कृते बहूनि कारणानि दर्शितानि। किन्तु एतानि कारणानि प्रतिकूलानि असमीचीनानि च। अतः असद्योगः। अत्र मम्मटाचार्येण उक्तम् - '**एष एव समुच्चयः सद्योगे, असद्योगे, सदसद्योगे च पर्यवस्यतीति न पृथक् लक्ष्यते।**'

२. **कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी**
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम्।
प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति सुतरां दर्पं राजन्! त एव तवाङ्कुशाः।।

अत्र राज्ञः कृते '**कुलममलिनम्**' इति अभिमानाय दर्पाय - अलम् तथापि अन्यानि सत्कारणानि दर्शितानि। अतः सतां योगः।

३. **शशी दिवसधूसरो गलितयौवना कामिनी**
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे।।

मम्मटानुसारमत्र '**शशिनि धूसरे शल्ये शल्यान्तराणीति शोभनाशभनयोगः।**' प्रदीपकारेण उक्तम् - '**अत्र सदसतोर्योगः। दुर्जनस्यासत्त्वात् शश्यादीनां सत्त्वात्।**' '**स त्वन्यो युगपत् या गुणक्रियाः।**' अर्थात् यत्र गुणः क्रिया च युगपत् (साकं) भवतः तत्र अन्यः समुच्चयालङ्कारः। अत्र - गुणद्वयम् अथवा क्रियाद्वयम् एकस्मिन् समये भवतिः। - एकः गुणः एका क्रिया च एकस्मिन् समये भवतः। गुणक्रिया इत्युक्ते १. गुणद्वयम् २. क्रियाद्वयम् ३. एकः गुणः एका क्रिया च एतेषां युगपद्वर्णनेन द्वितीयः समुच्चयो भवति।

१. **विदलितसकलारिकुलं तव बलमिदभवदाशु विमलं च।**

प्रखलमुखानि नराधिप ! मलिनानि च तानि जातानि॥

अत्र चम्वा: **'विमलत्वं'** तथा च खलस्य **'मलिनत्वम्'** इति गुणद्वयस्य युगपद्वर्णनेन समुच्चयालङ्कार:।

२. **अयमेकपदे तथा वियोग: प्रियया चोपनत: सुदु:सहो मे।**

नवबारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यै:॥

अत्र **'उपमत:'** **'भवितव्यं'** च इति क्रियाद्वयस्य युगपद्वर्णनेन समुच्चयालङ्कार:।

३. **कलुषं च तवाहितेष्वकस्मात् सितपङ्केरुहसोदरश्रि चक्षु:।**

पतितं च महीपतीन्द्र ! तेषां वपुषि प्रस्फुटमापदां कटाक्षै:॥

अत्र **'कलुषम्'** इति विशेषणस्य **'कटाक्षपातात्'** इति च क्रियाया: युगपद्वर्णनेन तृतीय: समुच्चय:। ४. **'धुनोति चासिं तनुते --- न वाच्यम्'** इत्यत्र रुद्रटाचार्येण उक्तम् यत् एकस्मिन् समये प्रकटीभूता: गुणा: वा प्रकटीभूता: क्रिया: विभिन्नस्थाने प्राप्येरन्। तै: चोक्तम् -

व्याधिकरणे वा यस्मिन् गुणक्रिये चैककालमेकस्मिन्।

उपजायेते देशे समुच्चय: स्यात्तदन्योऽसौ॥

मम्मटानुसारं स्थानं न महत्त्वपूर्णम्। गुणक्रिये एकस्मिन् अधिकरणेऽपि भवितुं शक्नुत:। ३४. **पर्यायालङ्कार:- एकं क्रमेणानेकस्मिन् पर्याय:।** एकं वस्तु क्रमेण अनेकस्मिन् भवति क्रियते वा स पर्यायालङ्कार:। अत्र - **एक: पदार्थ: क्रमेण नेकस्मिन् क्रियते**। अलङ्कारेऽस्मिन् क्रमस्य महत्त्वम्। यथा-

१. **नन्वाश्रयस्थितिरियं तव कालकूट ! केनोत्तरोत्तरविशिष्टपदोपदिष्टा।**

प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ कण्ठेऽधुना वससि वाचि पुन: खलानाम्॥

अत्र कालकूटस्य अनेकाश्रय: वर्तते। कालकूटस्य स्थिति: क्रमेण समुद्रे शिवस्य कण्ठे खलानां वाचि च। एकं वस्तु (कालकूटम्) क्रमेण अनेकस्मिन् भवति अत: पर्यायालङ्कार:। साहित्यदर्पणेऽपि उक्तम् -

'क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात्।

भवति क्रियते वा चेत् तदा पर्याय इष्यते॥'

'अन्यस्ततोऽन्यथा।' अनेकमेकस्मिन् क्रमेण भवति क्रियते वा सोऽन्य:। यथा

मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति।
अथ कथयति मोहहेतुमन्तर्गतमिव हालहलं विषं तदेव॥

अत्र खलस्य मुखे प्रथमं हलाहलं प्रकटीभवति अतः अनेकमेवास्मिन् क्रमेण भवति।

३५. **अनुमानालङ्कारः - अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः।** साध्यसाधनयोः यत् कथनं तत् अनुमानम्। अत्र अनुमानम् अर्थात् - '**अनुमितिकरणम् अनुमानम्।**' तथा च '**परामर्शजन्यं ज्ञानम् अनुमितिः।**' यथा पर्वतो वह्निमान् धूमवत्त्वात्। अनुमानस्य पञ्च - अवयवाः सन्ति। प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। मम्मटाचार्येण उक्तम् - '**पक्षधर्मान्वयव्यतिरेकित्वेन त्रिरूपो हेतुः साधनम्। धर्मिणि अयोगव्यवच्छेदो ज्ञापकस्य साध्यत्वम्।**' त्रिरूपो हेतु :- (१) पक्षधर्मत्वम् (पक्षसत्त्वम्) (२) अन्वयित्वम् (सपक्षसत्त्वम्) (३) व्यतिरेकत्वम्। (विपक्षव्यावृत्तत्वम्) पर्वतो वह्निमान् धूमतत्त्वात् '**इत्यत्र**' '**वह्निः**' **साध्यं** '**धूमः**' च साधनम्। (१) पक्षधर्मत्वम् (पक्षसत्त्वम्) - '**सन्दिग्धसाध्यवान् पक्षः**' अत्र पर्वतः पक्षः। धूमवत्त्वं पर्वतस्य धर्मः। अतः पक्षधर्मत्वं धूमे वर्तते। (२) अन्वयित्वम् (सपक्षसत्त्वम्) - '**निश्चितसाध्यवान् सपक्षः।**' धूमःमहानसेऽपि अस्ति अतः महानसः सपक्षः। तेन अन्वयित्वं (सपक्षसत्त्वं) सिध्यति। (३) व्यतिरेकित्त्वम् (विपक्षव्यावृत्तत्वम्) - '**निश्चितसाध्याभाववान् महाह्लदः विपक्षः।**' महाह्लदे धूमस्य अभावः। अतः विपक्षे महाह्लदे धूमस्य अभावात् व्यतिरेकत्वम्। एवं '**धूमवत्त्वम्**' इति साधने उपर्युक्तत्रीणि लक्षणानि सन्ति। धूमस्य धारणात् पर्वतो धर्मी। धर्मिणि पर्वते धूमवत्त्वात् अग्नेः व्यापकत्वं भवति। एवं पर्वतेन सह अग्नेः अयोगव्यवच्छेदः निश्चितो नियतो वा योगः। किन्तु एतत् अनुमानं काव्यमयं भवति। यथा -

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं
यत्तत्रैव पतन्ति सन्ततममी मर्मस्पृशो मार्गणाः।
तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः॥

अत्र पूर्वार्धे उक्तः '**मर्मस्पृशो मार्गणाः**' इति अर्थः साधनरूपः उत्तरार्धे चोक्तः '**धावत्यग्रत**' इति अर्थः साध्यरूपः। अतः अनुमानालङ्कार :। हेमचन्द्राचार्येणापि उक्तम् - '**हेतोः साधवगमोऽनुमानम्।**' विश्वनाथानुसारम् - '**अनुमानं तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्।**' ३८. **परिकरालङ्कारः - विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु**

सः। अभिप्राययुक्तैः (साकूतैः) विशेषणैः वस्तुवर्णनं क्रियते तदा परिकरालङ्कारः भवति। साभिप्रायानेकविशेषणद्वारा यत्र विशेषस्यातिशयप्रतीतिः सः परिकरालङ्कारः। - विशेषणानि केवलं न सार्थकानि अपि तु विशेषार्थयुक्तानि प्रतीयमानार्थयुक्तानि च भवन्ति। तत्र प्रतीयमानार्थो वाच्यार्थोन्मुखो भवति। सार्थकविशेषणैः काव्यसौन्दर्यं समागच्छति। यथा -

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।

न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्॥

अत्र **'महौजसः'**, **'मानधनाः'** इत्यादिभिः विशेषणैः दुर्योधनं प्रति धनभृतां स्वाभाविकः स्नेहः सूचितः वर्तते। अभिप्राययुक्तानां विशेषणानां प्रयोगेण अत्र परिकरालङ्कारः। मम्मटाचार्यानुसारं सामान्यतया विशेषणानि विशेष्यं पुष्टीकुर्वन्ति। निरर्थकैः विशेषणैः काव्यदोषो भवति। अतः अभिप्राययुक्तैः - साकूतैः विशेषणैः अपुष्टार्थत्वदोषात् मुक्तिः भवति। किन्तु दोषाभावात् अलङ्कारः न गणनीयः अतः एव मम्मटाचार्येण उक्तम् यत् - **'तथाप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलङ्कारमध्ये गणितः।'** **३७. व्याजोक्तिः अलङ्कारः** **व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम्।** वस्तुनः निगूढमपि रूपं कथमपि यदा प्रकटीभवति तदा केनापि व्याजेन यद् निगूह्यते सा व्याजोक्तिः। मम्मटाचार्यस्य अनुसारम् अपह्नुतिः व्याजोक्तेः भिन्ना यतः अपह्नुतौ प्रकृताप्रकृतयोः साम्यं विवक्षितं भवति, तेनैव साम्येन उपमेयस्य अपह्नवः क्रियते। किन्तु व्याजोक्तौ प्रकृताप्रकृतयोः साम्यं न भवति। यथा-

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्-

रोमाञ्चादिविसंष्टुलाखिलविधिव्यासङ्गभङ्गाकुलः।

हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं

शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः॥


अत्र पार्वत्याः हस्तस्पर्शेन रोमाञ्चादिभावाः शिवे समुत्पन्नाः किन्तु शैत्यकारणतया अत्र प्रकाशितत्वाद् व्याजोक्तिः।

३८. परिसंख्यालङ्कारः

किंचित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते।

तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता॥

प्रमाणान्तरेण ज्ञानं वस्तु शब्देन प्रतिपाद्य प्रयोजनान्तराभावात् तत्सदृशवस्तुनिषेधे पर्यवस्यति तदा परिसंख्यालङ्कारः भवति। अत्र - किंचित् पृष्टमपृष्टं वा तेन आधारेण प्रश्नकथनम्। - तेन कथनेन प्रश्नेन वा तत्सदृशवस्तुनः निषेधः। मम्मटाचार्यानुसारं - **'अत्र च कथनं प्रश्नपूर्वकं तदन्यथा च परिदृष्टम्। तथोभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारो भेदाः।'**



यथा -

१. **किमासेव्यं पुंसा ? सविधमनवद्यं द्युसरितः**
किमेकान्ते ध्येयं ? चरणयुगलं कौस्तुभभृतः।
किमाराध्यं ? पुण्यं किमभिलषणीयं ? च करुणा
यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति॥

अत्र गङ्गातटम्, विष्णोः चरणयुगलम् इत्यादीनां सेव्यत्वं प्रसिद्धम्। अतः तेषां सेव्यत्वस्य प्रतिपादनं प्रयोजनं न अपि तु तस्मात् भिन्नस्त्रीनितम्बादीनां सांसारिकवस्तूनां सेव्यत्वस्य निषेधाय एतस्य पद्यस्य रचना कृता। अतः प्रश्नपूर्विका प्रतीमानव्यवच्छेद्यपरिसंख्या।

२. **किं भूषणं सुदृढमत्र ? यशो न रत्नं**
किं कार्यमार्यचरितं सुकृतं न दोषः।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम्॥

अत्र यश आदीनां चिरस्थायित्वं सर्वविदितम्। अतः तेषां प्रतिपादनं प्रयोजनं न,

अपि तु रत्नादीनां निषेधाय एतत्पद्यम्। अतः प्रश्नपूर्विका वाच्यव्यवच्छेद्यपरिसंख्या।

३. **कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते।**
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति॥

अत्र कौटिल्यं कुचनिचये अस्ति अतः अन्यत्र (हृदये) नास्ति इति निषेधाय एतत्पद्यम्। अत्र निषेधस्य शब्दतः ग्रहणं न कृतम् अतः अप्रश्नपूर्विका प्रतीयमानव्यवच्छेद्यपरिसंख्या।

४. **भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे।**
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम्॥

अत्र विभावादीनां निषेधः शब्देन कृतः। तस्य च प्रतिपादनं विना प्रश्नेन कृतम्। अतः अप्रश्नपूर्विका वाच्यव्यवच्छेद्यपरिसंख्या। हेमचन्द्राचार्येण उक्तम् - **'पृष्टे अपृष्टे वा अन्यापोहपरोक्तिः परिसंख्या।'** जगन्नाथाचार्येण चोक्तम् - **'सामान्यतः प्राप्तस्य अर्थस्य कस्माच्चिद्विशेषाद् व्यावृत्तिः।'** **३९. कारणमाला अलङ्कारः**

यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता।
तदा कारणमाला स्यात्।

प्रत्येकं पूर्वोक्तं विधानं पश्चादुक्तविधानस्य हेतुः (कारणम्) भवति तदा कारणमाला - अलङ्कारः। अत्र - अनेकानि विधानानि भवन्ति। पूर्वोक्तविधानम् उत्तरार्धोक्तस्य कारणं भवति। एतादृशानां कारणानां परम्परा शृंङ्खला वा भवति। अत्र प्रारम्भः कारणेन भवति। यथोत्तरम् = उत्तरम् उत्तरं प्रति। यथा

जितेन्द्रित्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः॥

अत्र **'जितेन्द्रियत्वं विनयस्य कारणम्' 'विनयात् गुणप्रकर्षः' 'गुणप्रकर्षेण जनोऽनुरज्यते', 'जनानुरागात् च सम्पदः।'** एवं पूर्वोक्तविधानम् उत्तरार्धोक्तस्य कारणं भवति। अत्र उत्तरम् उत्तरं प्रति पूर्वस्यार्थस्य हेतुतायाः उपलक्षणं मत्वा पूर्वं पूर्वं प्रति उत्तरस्यार्थस्य हेतुता वर्णिता अस्ति अतः कारणमाला - अलङ्कारः। विश्वनाथेन उक्तम् - **'परं परं प्रति यदा पूर्वपूर्वस्य हेतुता तदा कारणमाला स्यात्।'** जगन्नाथेन चोक्तम् यत् - **'आनुगुण्यस्य कार्यकारणभावरूपत्वे कारणमाला।'** **४०. अन्योन्यालङ्कारः - क्रियया तु परस्परम् वस्तुनोर्जननेऽन्योन्यम्।** क्रियया वस्तुद्वयं परस्परं जनयति तदा अन्योन्यालङ्कारः। एकया क्रियया वस्तुद्वयं परस्परं सृजति। अत्र क्रिया एका एव भवेत्।

वस्तुद्वयम् एकां क्रियां जनयति। एकं वस्तु द्वितीयं द्वितीयं च प्रथमम् एवं वस्तुद्वयं क्रियां जनयति। अत्र क्रियया वस्तुद्वयं परस्परं सृजति तत्र वैचित्र्यम्। यथा -

हंसानां सरोभिः श्रीः सार्यतेऽथ सरसां हंसैः।

अन्योन्यमेवैत आत्मानं केवलं गुरूकुर्वयन्ति।।

अत्र सरोभिः हंसाना हंसैः च सरसां श्रीः वर्धते। एवं सराः तथा च हंसाः परस्परं भावयन्तः स्वं गुरूकुर्वन्ति। अतः अन्योऽन्यालङ्कारः। विश्वनाथानुसारम् - **'अन्योन्यमुभयोरेकः क्रियायाः करणं मिथः।'** तथा चोक्तं जगन्नाथेन - **'द्वयोः अन्योन्येन अन्योन्यस्य विशेषाभिधानम् अन्योन्यम्।'** **४१. उत्तरालङ्कारः उत्तरश्रुतिमात्रतः।**

प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति।।

असकृद्यदसम्भाव्यमुत्तरं स्यात् तदुत्तरम्।

यत्र श्रुतिमात्रेण प्रश्नस्यावगमनं भवति तथा च प्रश्ने सति असकृत् असम्भाव्यमुत्तराणि भवन्ति तत्र उत्तरालङ्कारः। अत्र उत्तरालङ्कारस्य प्रकारद्वयम् १. उत्तरस्वरूपेणैव यत्र प्रश्नस्य कल्पना क्रियते। २. प्रश्ने सति अनेकानि अकल्प्यमानानि उत्तराणि भवन्ति। यथा -

१. **वाणिजक ! हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च।**

यावत् लुलितालकमुखी गृहे परिष्वक्कते स्नुषा।।

अत्र **'यावत् लुलितालकमुखी स्नुषा (पुत्रवधूः) गृहे अस्ति तावत् कुतः हस्तिदन्ताः व्याघ्रचर्म च ?'** इति उत्तरेण भवान् हस्तिदन्तान् व्याघ्रचर्म च विक्रीणाति ? इति प्रश्नस्य अवगमनं भवति। एवम् उत्तरेण प्रश्नस्य कल्पना भवति अतः उत्तरालङ्कारः। काव्यलिङ्गात् तथा च अनुमानालङ्कारात् उदात्तः भिन्नः तत्प्रतिपादयितुं मम्मटाचार्यः वदति यत् - **'न चैतत् काव्यलिङ्गम्, उत्तरस्य तादूपनुपपत्तेः। नहि प्रश्नस्य प्रतिवचनं जनको हेतुः। नापीदमनुमानम्, एकधर्मिनिष्ठतया साध्यसाधनयोरनिर्देशादित्य-लङ्कारान्तरमेवोत्तरं साधीयः।'**

२. **का विषमा दैवगतिः किं लब्धव्यं यत् जनो गुणग्राही।**

किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः।।

अत्र **'का विषमा ?'**, **'किं लब्धम्'** इत्यादयः प्रश्नाः। प्रश्ने सति असम्भाव्यमानानि उत्तराणि दत्तानि। वयं कल्पनां कर्तुम् अशक्ताः तादृशानि उत्तराणि

वर्तन्ते अत्र। अत: द्वितीय: उत्तरालङ्कारोऽयम्। अलङ्कारसर्वस्वकारेणोक्तम् - **'उत्तरात् प्रश्नोन्नयनम्, असकृदसंभाव्यमुत्तरं चोत्तरम्।'** जगन्नाथेन चोक्तम्- **'प्रश्नप्रतिबन्धकशानविषयीभूतोऽर्थ उत्तरम्।'** **४२. सूक्ष्मालङ्कार:**

कुतोऽपि लक्षित: सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते।।

धर्मेण केनचिद् यत्र तत् सूक्ष्मं परिचक्षते।

कुतोऽपि ज्ञात: सूक्ष्मोऽर्थ: धर्मेण (गुणेन) केनचिद् आकारेण इङ्गितेन वा ज्ञात्वा अन्यस्मै प्रकटीक्रियते तत्र सूक्ष्मालङ्कार:। **'कुतोऽपि आकारादिङ्गिताद् वा। सूक्ष्मस्तीक्ष्णमतिसंवेद्य:।'** अर्थात् सूक्ष्मम् अर्थं कोऽपि तीक्ष्णमति: ज्ञातुं शक्नोति। पुन: शरीरस्य चेष्टा आकार इङ्गितानि अत्र महत्त्वपूर्णानि। यथा -

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे।

पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख।।

अत्र सखी नायिकाया: कण्ठे स्वेदबिन्दुप्रबन्धै: भिन्नकुङ्कुमं दृष्ट्वा ज्ञातवती यत् तया नायकेन सह विपरीता रतिक्रीडा कृता। खड्गेन पुरुष: शोभते। अत: संभोगे नायिकाया: पुंस्त्वं दर्शयितुं सख्या तस्या: हस्ते खड्गलेखा चित्रिता। अलङ्कारसर्वस्वकार: वदति यत् - **'संलक्षितसूक्ष्मार्थप्रकाशनं सूक्ष्मम्।'** साहित्यदर्पणकारोऽपि कथयति -

'संलक्षितस्तु सूक्ष्मोऽर्थ: आकारेणेङ्गितेन वा।

कयापि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते।।'

४३. सारालङ्कार: - उत्तरोत्तरमुत्कर्षो भवेत्सार: परावधि:।। परावधि := पराकाष्ठापर्यन्तम्,उत्तरम् उत्तरम् उत्कर्षो यत्र भवति तत्र सारालङ्कार:। अत्र क्रमेण वस्तूनि भवन्ति। पूर्वस्य अपेक्षया उत्तरवस्तु श्रेष्ठं भवति। पराकाष्ठापर्यन्तं धाराधिरोहितया क्रम: चलति। यथा

राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम्।

सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम्।।

अत्र राज्ये वसुधायां पुरं, पुरे सौधम् (हर्म्यम्), सौधे तल्पम् तल्पे च वराङ्गना, एवं वराङ्गनायां पराकाष्ठा प्रदर्शिता। **४४. असङ्गति: अलङ्कार:**

भिन्नदेशतयात्यन्तं कार्यकारणभूतयो:।

युगपद्धर्मयोर्यत्र ख्याति: सा स्यादसङ्गति:।।

यत्र कार्यकारणभूतवस्तूनि अत्यन्तभिन्नदेशतया (विभिन्ने स्थाने) युगपद् (साकं) दृश्यते तत्र असङ्गतिः स्यात्। अत्र - पदार्थद्वयं कार्यकारणसम्बन्धे भवति। द्वौ पदार्थौ भिन्नाश्रयौ तथापि एकस्मिन् समये युगपद् दृश्येते तत्रैव एष अलङ्कारः। यथा -

यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोऽलीकम्।

दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम्॥

यस्य व्रणः भवति तस्य वेदना इति व्यवहारः। किन्तु कविः अत्र नियमभङ्गं करोति यत् दन्तक्षतं वध्वाः कपोले तथापि वेदना सपत्नीनाम्। अत्र कार्यकारणयोः सङ्गतिभङ्गः - असङ्गतिः। अत्र विरोधः न अपि तु विरोधालङ्कारस्य अपवादो वर्तते। विरोधे एकस्मिन् स्थले वस्तूनां विरोधः अत्र तु विभिन्नेषु स्थलेषु विरोधः अतः असङ्गतिः। **४५. समाधिः अलङ्कारः - समाधिः सुकरं कार्यं कारणान्तरयोगतः।** अन्यकारणस्य योगेन यत्र कार्यं सुकरं भवति तत्र समाधिः। अत्र किञ्चित् कार्यं मुख्यकारणेन भवति। तत्कार्यं कर्तुं द्वितीयं कारणं साहाय्यं करोति। एवम् अन्यकारणयोगतः कार्यम् अधिकं सुकरं भवति। यथा

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः।

उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम्॥

अत्र नायिकायाः मानं निराकर्तुं नायकः चरणस्पर्शं करोति तदा एव उपकाराय मेघगर्जना श्रूयते। मानं निराकर्तुं **'घनगर्जितम्'** इति द्वितीयं कारणं साहाय्यं करोति। तेन कार्यं सुकरं भवति, अतः समाधिः अलङ्कारः। अलङ्कारसर्वस्वकारेण उक्तं - **'कारणान्तरयोगात् कार्यस्य सुकरत्वं समाधिः'** विश्वनाथेन चोक्तम् - **'समाधिः सुकरे कार्ये दैवाद् वस्त्वन्तरागमात्।'** **४६. समालङ्कारः- समं योग्यतया योगो यदि सम्भावितः क्वचित्।** योग्यतया वस्तुद्वयस्य यदि सम्भावितः सम्बन्धः (योगः) भवति तदा समम् अलङ्कारः। अत्र वस्तुद्वयस्य मेलनं भवति। मेलनम् अपि योग्यं भवति। सद्वस्तूनां योगः सद्योगसमम् तथा च असद्वस्तूनां योगः असद्योगः। यथा -

१. **धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी**
रूपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य।
जातं दैवात्सदृशमनयोः सङ्गतं यत् तदेतत्
शृङ्गारस्योपनतमधुना राज्यमेकातपत्रम्॥

अत्र देवः (राजा) अनुपमः तथा च मृगाक्षी (नायिका) अपि शिल्पातिशयनिकषस्थानम् अस्ति। अनयोः सङ्गतं दैवात् - (भाग्यात्) संजातम्। अत्र

सद्वस्तूनां योगः अतः सद्योगसमम्।

२. **चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं**
जातो दैवादुचितरचनासंविधाता विधाता।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः ॥

अत्र निम्बानां फलानाम् एवं च तान् खादतां काकानां योगः। द्वावपि पदार्थौ निम्नौ स्तः। अतः असद्योगसमम्। विश्वनाथानुसारं समस्य लक्षणम् - **'समं स्यादानुरूप्येण श्लाघा योग्यस्य वस्तुनः।'** जगन्नाथानुसारं - **'अनुरूपसंसर्गः समम्।'** ४७. **विषमालङ्कारः**

क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात्।
कर्तुः क्रियाफलावाप्तिनैवानर्थश्च यद् भवेत् ॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये।
क्रमेण च विरुद्धे यत् स एष विषमो मतः ॥

मम्मटाचार्येण विषमालङ्कारस्य चत्वारः प्रकाराः दर्शिताः। (१) वैधर्म्यात् वस्तुद्वयस्य योगः असंभवः तत्र .क्व. योगेन योगः दर्श्यते। (२) कर्ता क्रियायाः अभीष्टफलं न प्राप्नोति अपि तु .अनर्थः संजायते तदा द्वितीयो विषमः। (३) कार्यस्य गुणे कारणस्य च गुणे विषमता भवेत्, कारणस्य गुणाः कार्यस्य गुणैः विरुद्धाः, इति कथनं भवति तदा तृतीयो विषमः। (४) कारणकार्ययोः क्रिये परस्परं विरुद्धतां व्रजतः तत्र चतुर्थो विषमः। यथा -

१. **शिरीषादपि मृद्वङ्गी क्वेयमातलोचना।**
अयं क्व च कुकूलाग्निकर्कशो मदनानलः ॥

अत्र **'क्वेयं शिरीषमृद्वङ्गी क्व मदनज्वरः'** द्वयोः योगः असंभवः तथापि **'क्व'** योगेन योगः दर्शितः। अतः प्रथमो विषमः।

२. **सिंहिकासुतसन्त्रस्तः शशः शीतांशुमाश्रितः।**
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः ॥

अत्र सिंहात् त्रस्तः शशः शीतांशुमाश्रितः किन्तु स अभीष्टफलं न प्राप्तवान्। अपि तु आश्रयसहितं राहुद्वारा सः ग्रसितः। तेन अनर्थस्य प्राप्तिः।

३. **सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा।**

तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं प्रसूते।।

अत्र कार्यभूतयशसः तथा च कारणभूतकृपाणस्य गुणः परस्परं विपरितः। कृपाणः तमालवर्णयुक्तः तेन पाण्डुवर्णयुक्तस्य यशसः उत्पत्तिः दर्शिता, अतः तृतीयो विषमालङ्कारः।

४. **आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम्।**

विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे।।

अत्र नायिका नायकाय आनन्दं ददाति। नायिकायाः विरहः नायकाय संतापं यच्छति। एवम् आनन्ददानं शरीरतापेन विरुध्यते। अत्र आनन्ददानं कारणस्य क्रिया तथा च शरीरसंतापदानं कार्यस्य क्रिया एवं क्रिये परस्परं विरुद्धतां भजतः। **'विरूपकार्यनर्थयोरुत्पत्तिः विरूपसंघटना च विषमम्।**[२]**'** इति अलङ्कारसर्वस्वकारो वदति। जगन्नाथानुसारं - **'अननुरूपसंसर्गः विषमम्।'** ४८. **अधिकालङ्कारः**

महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात्।

आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत्।।

यत्र स्वभावतः महान्तौ आधेयाधारौ क्रमात् तनुत्वेऽपि (लघुत्वेऽपि) महीयांसौ स्यातां तत्र अधिकालङ्कारः। अत्र आश्रितः आधेयम् आश्रयः = आधारः। आधेयाधारौ उत्कर्षबोधनाय महीयांसौ व्रजतः। एवम् अधिकोऽपि द्विविधः - (१) आश्रयलाघवरूपः (२) आधेयलाघवरूपः च।

१. **अहो विशालं भूपाल ! भुवनत्रितयोदरम्।**

माति मातुमशक्योऽपि यशोराशिर्यदत्र ते।।

अत्र **'यशोराशिः'** इति आधेयम्, तस्य अपेक्षा वा **'भुवनत्रितयोदरम्'** लघुः। किन्तु यशोराशेः महत्त्वं दर्शयितुं तनुत्वेऽपि आधारस्य विशालतायाः वर्णनं कृतमस्ति यत् - अहो विशालं भूपाल! भुवनत्रितयोदरम्। अतः अत्र आश्रयलाघवरूपः प्रथमो भेदः।

२. **युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत।**

तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः।।

अत्र **'मुदः'** इति आधेयम् **'भगवच्छरीरम्'** आधारः च। आधेयं **'मुदः'** अल्पः अपि उत्कर्षाय तस्यै भगवच्छशरीरम्' इति आधारस्य आधिक्यं प्रदर्शितम्। अतः अत्र आधारलाघवरूपो द्वितीयो भेदः। जगन्नाथेनोक्तम् - **'आधाराधेययोरन्यतरस्य अति**

विस्तृतत्वसिद्धिफलकमितरस्य अतिन्यूनत्वकल्पनमधिकम्।' ४९. प्रत्यनीकालङ्कार:

प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया।

या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते॥

यदा स्वस्थप्रतिपक्षं (शत्रुं) प्रतिकर्तुम् असमर्थेन जनेन तस्य (शत्रो:) सम्बन्धिन: तिरस्कारेण विजय: क्रियते तदा प्रत्यनीकालङ्कार: भवति। अत्र - शत्रु: बलिष्ठ: भवति, व्यक्ति च निर्बल:। - निर्बल: शत्रो: हानिं कर्तुम् अशक्त:। - निर्बल: शत्रो: सम्बन्धिजनस्य हानिं करोति। - तेन बलिष्ठरिपो: गौरवं वर्धते। यथा-

त्वं विनिर्जितमनोभवरूप: सा च सुन्दर ! भवत्यनुरक्ता।

पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव काम:॥

अत्र कामदेव: नायकस्य किमपि कर्तुम् अशक्त: किन्तु पञ्चभि: बाणै: नायिकाया: विरहवेदनां (कामं) वर्धयति। तेन नायकस्य एव गौरवं वर्धते अत: प्रत्यनीकालङ्कार:।

५०. मीलितालङ्कार:

समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते।

निजेनागन्तुना वापि तन्मीलितमिति स्मृतम्॥

यदा सहजस्य आगन्तुकस्य वा साधारणेन लक्षणेन एकवस्तुना द्वितीयवस्तु निगूह्यते तदा मीलितालङ्कार: भवति। अत्र वस्तुद्वयं भवति। तयो: एक: गुण: सामान्य:। बलिष्ठवस्तुना द्वितीयवस्तु निगूह्यते। मीलितमपि द्विविधम् - सहजमीलितम् आगन्तुकमीलितम् च।

१. **अपाङ्गतरले दृशौ मधुरवक्त्रवर्णा गिरो**

विलासभरमन्थरा गतिरतीव कान्तं मुखम्।

इति स्फुरितमङ्गके मृगदृश: स्वतो लीलया

तदत्र न महोदय: कृतपदोऽपि संलक्ष्यते॥

अत्र नायिकाया: शरीरे दृक्तरलत्वादिस्वाभाविकसहजलक्षणानि प्राप्यन्ते। एतानि लक्षणानि मदावस्थायामपि प्राप्यन्ते। एवं स्वाभाविकतया प्रसिद्धिवशात् मदोदयस्य तिरस्कार: भवति, अत: सहजमीलितालङ्कार:।

२. **ये कन्दरासु निवसन्ति सदा हिमाद्रे-**

स्त्वत्पातशङ्कितधियो विवशा द्विषस्ते।

अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं
तेषामहो बत भियां न बुधोऽप्यभिज्ञः।।

अत्र हिमालयस्य कन्दरासु निवासकारणस्य सामर्थ्येन शैत्यस्य आगन्तुकत्वात् शैत्येन उत्पन्नयोः कम्पपुलकयोः अपि आगन्तुकधर्मः। तयोः भयजन्यकम्पपुलकाभ्यां सह समानता। एवं साधारणागन्तुकत्वात् भयरूपवस्तु तिरस्कृतं भवति, अतः आगन्तुकमीलितालङ्कारः। विश्वनाथानुसारं **'मीलितं वस्तुनो गुप्तिः केनचित्तुल्यलक्षमणा।'** अप्पयदीक्षितेन उक्तं - **'मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते।'**

५१. एकावली अलङ्कारः

स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम्।
विशेषणतया यत्र वस्तु सैकावली द्विधा।।

यदा पूर्वं पूर्वं वस्तु प्रति उत्तरम् उत्तरं वस्तु विशेषणतया स्थाप्यतेऽपोह्यते वा तदा एकावली - अलङ्कारः भवति। अत्र पूर्वं प्रति यथोत्तरस्य वस्तुनः विशेषताभावेन प्रतिपादनं भवति अथवा निषेधो भवति। एवम् एकावली द्विधा।

१. **पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्ग्यः।**
रूपं समुन्मीलितसद्विलासम् अस्त्रं विलासाः कुसुमायुधस्य।।

अत्र प्रथमे चरणे पुरस्य विशेषणं वराङ्गना। द्वितीये चरणे वराङ्गनायाः विशेषणं रूपम्। तृतीये चरणे रूपस्य विशेषणं विलासः। चतुर्थे च चरणे विलासाः कुसुमायुधस्य अस्त्रम्। एवं पूर्वं पूर्वं प्रति उत्तरम् उत्तरं विशेषणतया प्रतिपादितम्, अतः प्रथमः एकावली अलङ्कारः।

२. **न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम्।**
न षट्पदोऽसौ कलगुञ्जितो न यो न गुञ्जितं तन्न जहार यन्मनः।।

अत्र पूर्वं प्रति उत्तरस्य विशेषतया निषेधो वर्तते, अतः द्वितीयः एकावली - अलङ्कारः। **''गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता''** इति अप्पयदीक्षितेनोक्तम्। जगन्नाथानुसारं - **'सैव शृंङ्खला संसर्गस्य विशेष्यविशेषभावरूपत्वे एकावली।'**

५२. स्मरणालङ्कारः - यथाऽनुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः स्मरणम्।

पूर्वं दृष्टं वस्तु दृष्ट्वा तत्सदृशवस्तुनः पूर्वानुभवेन स्मृतिः भवति सः स्मरणालङ्कारः। अत्र व्यक्तेः मनसि कस्यश्चित् वस्तुनः संस्काराः वर्तन्ते। तत्सदृशवस्तुनः दर्शनेन समानताऽऽधारेण पूर्ववस्तुनः स्मरणं भवति। यथा -

१. **निम्ननाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः।**

तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः सुरतकण्ठरुतानाम्॥

अत्र सुरनारीणां जलक्रीडायाः वर्णनमस्ति। जलक्रीडायां सुरनारीणां नाभिकुहरेषु लहरीभिः यज्जलं क्षिप्तं तेन कुहरूतैः सुरतकण्ठध्वनेः स्मरणम् अभवत्। अतः स्मरणालङ्कारः।

२. **करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य।**

संस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम्॥

अत्र यशोदायाः स्तनपानं कुर्वन् बालकृष्णः पाञ्चजन्य-शङ्खस्य स्मरणं करोति, अतः स्मरणालङ्कारः। **५३. भ्रान्तिमान् अलङ्कारः- भ्रान्तिमानन्यसंवित् तत्तुल्यदर्शने।** तत् - अर्थात् अप्राकरणिकः तत्तुल्य = प्राकरणिकः अप्राकरिणकेन समं प्राकरणिकवस्तु दृष्ट्वा अप्राकरणिकार्थस्य बोधः भवति तत्र भ्रान्तिमान्-अलङ्कारः। अत्र वस्तुतः भ्रमः न भवति किन्तु अर्थानुगमनेन संज्ञायाः प्रवृत्तेः न रूपकम् अतिशयोक्तिः वा। यथा -

कपाले मार्जारः पय इति करान् लेढि शशिनः

तरुच्छिद्रप्रोतान् बिसमिति करी सङ्कलयति।

रतान्ते तल्पस्थान् हरति वनिताऽप्यंशुकमिति

प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति।

अत्र शुभ्रतया अप्रकृतदुग्धादितुल्यानां चन्द्रकिरणानां दर्शने सति मार्जारादीनाम् अप्रकृतदुग्धादित्वेन ज्ञानमिति सदृशदर्शनजन्या भ्रान्तिरलङ्कारः। **५४. प्रतीपालङ्कारः**

आक्षेप उपमानस्य प्रतीपमुपमेयता।

तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धनम्॥

उपमानस्य आक्षेपं कृत्वा तस्य व्यर्थतायाः प्रतिपादनं क्रियते तदा प्रथमं प्रतीपम्। अथवा उपमानस्य तिरस्काराय उपमानम् उपमेयं क्रियते तदा द्वितीयः प्रतीपम्। यथा

१. **लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां**

देव ! त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा।

इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं

चिन्तारत्नमदो मुधैव किममी सृष्टाः कुलक्ष्माभृतः॥

अत्र लावण्यादिगुणयुक्तः राजा उपमेयम्। उपमेये सति **'इन्दुः'** इति उपमानस्य

व्यर्थतायाः प्रतिपादनं कृतम् अतः प्रथमं प्रतीपम्।

२. **अयि एहि तावत् सुन्दरि ! कर्णं दत्त्वा शृणुष्व वचनीयम्।**

तव मुखेन कृशोदरि ! चन्द्र उपमीयते जनेन।।

अत्र **'चन्द्रः'** उपमानम् तथा च **'मुखम्'** इति उपमेयम्। उपमानम् उपमेयीकृत्य तस्य तिरस्कारः कृतः अतः द्वितीयं प्रतीपम्। अलङ्कारसर्वस्वकारानुसारम्- **'उपमानस्याक्षेपः उपमेयताकल्पनं वा प्रतीपम्।'** साहित्यदर्पणकारेण चोक्तम् -

'प्रसिद्धस्योपमानस्योपमयेत्वप्रकल्पनम्।

निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते।।'

५५. सामान्यालङ्कारः

प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया।

ऐकात्म्यं बध्यते योगात् तत्सामान्यमिति स्मृतम्।।

प्रस्तुतस्य अप्रस्तुतेन सह योगात् = सम्बन्धात् गुणसाम्यविवक्षया यदा अभेदवर्णनं क्रियते तदा सामान्यालङ्कारः। अत्र प्रस्तुताप्रस्तुतयोः सादृश्यवशात् अभेदः कल्प्यते। समानगुणैः वस्तुद्वयस्य ऐकात्म्यं सिद्धयति। यथा -

मलयजरसविलिप्ततनवो नवहारलताविभूषिताः

सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः।

शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः

प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः।।

अत्र अभिसारिकाः श्वेतवस्त्राणि धृतवत्यः सन्ति। ता अभिसारिकाः प्रस्तुताः चन्द्रः च अप्रस्तुतः। द्वयोः धवलता गुणसाम्यम्। अत्र प्रस्तुताप्रस्तुतयोः अन्यूनानतिरिक्त - धवलत्वम् एकात्मता हेतुः। अतः अभिन्नत्वं भासते। अलङ्कारसर्वस्वकारेण उक्तं - **''प्रस्तुतस्य अन्येन गुणसाम्यादैकात्म्यं सामान्यम्।''** - **'सामान्यं यदि सादृश्याद् विशेषो नोपलक्ष्यते[५]'** इति कुवलयानन्दे चोक्तम्। **५६. विशेषालङ्कारः**

विना प्रसिद्धिमाधारमाधेयस्य व्यवस्थितिः।

एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा।।

अन्यत् प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः।

तथैव करणं चेति विशेषस्त्रिविधिः स्मृतः ॥

विशेषस्य त्रयः प्रकाराः १. प्रसिद्धाधारेण विना आधेयस्य स्थितिः प्रथमो विशेषः। २. एकः पदार्थः एकस्मिन् समये नैक स्थाने गोचरो भवति तदा द्वितीयो विशेषः। ३. अन्यत् कार्यं प्रकुर्वतः सहसा कस्यचित् अशक्यवस्तुनः प्राप्तिः भवति तदा तृतीयो विशेषः।

१. **दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम्।**

रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः ॥

कवीनां गिरः मरणानन्तरमपि रमयन्ति। अत्र प्रसिद्धः आधारः **'कवयः'** इति। **'कविवाणी'** (गिरः) इति आधेयम्। प्रसिद्धमाधारेण (कवीन्) विनाऽपि आधेयम् (गिरः) भवन्ति अतः प्रथमो विशेषः।

२. **सा वसति तव हृदये सैवाक्षिषु सा च वचनेषु।**

अस्मादृशीनां सुन्दर ! अवकाशः कुत्र पापानाम् ॥

अत्र एका सुन्दरी एकस्मिन् समये प्रियस्य हृदये अक्षिषु वचनेषु च वसति, अतः द्वितीयो विशेषः।

३. **स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजताऽनवद्यविद्यम्।**

विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च ॥

अत्र राज्ञः सर्जनेन विधिना भुवि नवः मनोभूः सविता बृहस्पतिश्च ससृजे। अत्र राजनिर्माणरूपेण एकेन कार्येण विधेः प्रयत्नेन द्वितीयं कामदेवादिरूपं कार्यं विहितम्, अतः तृतीयो विशेषः। अलंकारसर्वस्वकारेण उक्तम् - **'अनाधारमाधेयम्, एकमनेकगोचरम्, अशक्यवस्त्वन्तरकरणं विशेषः।** विश्वनाथानुसारं - **'यदाधेयमनाधारमेकं चानेकगोचरम्।**

किंचित् प्रकुर्वतः कार्यमशक्यस्येतरस्य वा।

कार्यस्य करणं दैवात् विशेषस्त्रिविधस्ततः ॥

५७. तद्गुणालङ्कारः -

स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत्।

वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ॥

न्यूनगुणयुक्तं वस्तु अत्यन्तोत्कृष्टगुणयुक्त वस्तुनः सम्बन्धात् स्वगुणं त्यक्त्वा तत्

अप्रस्तुतवस्तुनः रूपं प्राप्नोति तदा तद्‌गुणं परित्यजति। तत्प्रस्तुतवस्तूज्ज्वलाप्रस्तुतस्य वस्तुनः गुणं स्वीकरोति। यथा -

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या।

रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥

मम्मटाचार्येण उक्तम् - **'अत्र रवितुरगापेक्षया गरुडाग्रजस्य, तदपेक्षया च हरिन्मणीनां प्रगुणवर्णता।'** अत्र सूर्यस्य अश्वाः अरुणस्य रक्तवर्णम् अलङ्कुर्वन्ति। ते रैवतकपर्वतस्य नीलरत्नैः पुनः नीलवर्णं प्राप्नुवन्ति। **'स्वगुणत्यागादत्युत्कृष्टगुणस्वीकारः तद्‌गुणः।'** इति अलङ्कारसर्वस्वकारः। जगन्नाथानुसारं - **'स्वगुणत्यागपूर्वकं स्वसंनिहितवस्तत्वन्तसंबधिगुणग्रहणं तद्‌गुणः।'** **५८. अतद्‌गुणालङ्कारः - तद्रूपाननुहारश्चेदस्य तत् स्यादतद्‌गुणः।** योगादत्यज्ज्वलगुणस्य इति पदस्य अत्र अनुवृत्तिः भवति। अत्यन्त - उत्कृष्टगुणयुक्तवस्तुनः योगेन अपि न्यूनगुणयुक्तवस्तुद्वारा प्रस्तुतस्य वस्तुनः गुणस्य अनुसरणं न क्रियते तदा अतद्‌गुणालङ्कारः भवति। अत्र न्यूनगुणयुक्तवस्तु तदुज्ज्वलवस्तुनः गुणस्य स्वीकारं कर्तुं शक्नोति तथापि प्रस्तुतवस्तु अप्रस्तुतवस्तुनः गुणं न स्वीकरोति। यथा

धवलोऽसि यद्यपि सुन्दर ! तथापि त्वया मम रञ्जितं हृदयम्।

रागभरितेऽपि हृदये सुभग ! निहितो न रक्तोऽसि ॥

अत्र नायकः नायिकायाः हृदये संस्थापितः तथापि तस्याः रागेण न रञ्जितः। नायिकायाः हृदयम् अत्र प्रस्तुतवस्तु नायकः च अप्रस्तुतवस्तु। अप्रस्तुतवस्तु प्रस्तुतस्य रूपं न स्वीकरोति। **'सति हेतौ तद्‌गुणाननुहारः अतद्‌गुणः'** इति अलङ्कारसर्वस्वकारः। विश्वनाथानुसारं - **'तद्‌रूपाननुहारस्तु हेतौ सत्यप्यतद्‌गुणः।'** **५९. व्याघातालङ्कारः**

यद्यथा साधितं केनाप्यपरेण तदन्यथा ॥

तथैव यद्विधीयेत स व्याघात इति स्मृतः।

येनोपायेन वस्तु कार्यं वा साध्यते तेनैव उपायेन केनापि अन्यथा विधीयते तदा व्याघातालङ्कारः भवति। अत्र एकस्य साधनस्य उपयोगः भवति। तेन साधनेन वस्तुनः सिद्धिः तथा च तेनैव साधनेन वस्तुनः निष्फलता भवति। यथा

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।

विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥

अत्र शिवेन दृशा कामदेवः दग्धः तेनैव उपायेन वामलोचनाः कामदेवं प्रियतमानां

हृदये जीवितं कुर्वन्ति। कामनाशरूपसिद्धिः दृग्रूपेण तेनैव साधनेन अन्यथा क्रियते अतः व्याघातालङ्कारः। अपयदीक्षितानुसारं - **'यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः॥'** इति। **यथा लोके अङ्गदादिसम्बद्धपद्मरागप्रमुखमणिमेलनेऽधिकश्चमत्कारः, तथा प्रोक्तानाम् अलङ्काराणां संवलने समधिश्चमत्कारः, अतः सोऽप्यलङ्कारः। तत्र द्वयी विधा परस्परनिरपेक्ष्यव्यवस्थितेः तदभावाच्च। तत्राद्या संसृष्टिः द्वितीयस्तु सङ्करः।**

६०. **संसृष्टिरलङ्कारः सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः।** द्वयोः वा अधिकानां (तिलतण्डुलन्यायेन निरपेक्षस्थितिः) अलङ्काराणाम् एकस्मिन् काव्ये वाक्ये वा अन्योऽन्यनिरपेक्षतया या स्थितिः सा संसृष्टिः। सा स्थितिः शब्दभागे अर्थविषये एवम् उभयत्रापि भवति। १. शब्दालङ्कारसंसृष्टिः। २. अर्थालङ्कारसंसृष्टिः। ३. शब्दार्थालङ्कारसंसृष्टिः।

१. **वदनसौरभलोभपरिभ्रमद्भ्रमरसम्भ्रमसम्भृतशोभया।**
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशाऽन्यथा॥

पूर्वार्धे मकारस्य तथा च उत्तरार्धे लकारस्य प्रयोगेण अनुप्रासालङ्कारः। चतुर्थे चरणे 'लकलो - लकलो' इति आवृत्तिः अतः यमकालङ्कारः। तथा चानुप्रासयमकयोः शब्दालङ्कारयोः परस्परनिरपेक्षयोः योगात् संसृष्टिरलङ्कारः।

२. **लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
असत्पुरुषसेवेव दृष्टिर्विफलतां गता।

अत्र पूर्वार्धे लेपनविषयिणी वर्णविषयिणी च उत्प्रेक्षा। **'असत्पुरुषसेवेव'** इत्यत्र उपमालङ्कारः। तयोः अर्थालङ्कारयोः परस्परनिरपेक्षयोः योगात् संसृष्टिरलङ्कारः।

३. **स नास्त्यत्र ग्रामे य एनां महमहायमानलावण्यकाम्।**
तरुणानां हृदयलुण्ठाकीं परिष्वक्कमानां निवारयति॥

अत्र पूर्वार्धे तकारखकारात्मकस्य अनेकव्यञ्जनस्य **'हृदयलुण्ठाकी'** इत्यत्र रूपकम्। तयोः परस्परनिरपेक्षयोः एकत्र वाक्ये छन्दसि वा संसर्गः समवेतत्वात् संसृष्टिः। **६१. सङ्करालङ्कारः** - यत्र द्वयोः वा अधिकानाम् अलङ्काराणां नीरक्षीरन्यायेन सापेक्षरूपा या स्थितिः काव्ये वाक्ये वा भवति तत्र सङ्करः। **नीरक्षीरन्यायेन तु सङ्करः।** तस्य त्रयः भेदाः १. अङ्गाङ्गिभावसङ्करः। २. सन्देहसङ्करः। ३. एकाश्रयानुप्रवेशसङ्करः। **१. अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं सङ्करः।** स्वस्य स्वरूपमात्रेण येषाम् अलङ्काराणां विश्रान्तिः न भवति किन्तु अङ्गाङ्गिभावः भवति तत्र अङ्गाङ्गिभावसङ्करः। पूर्वोक्ता

एवालङ्कारा: यत्रात्मभावे, अनासादितात्मभावा: परस्परम् अनुग्राह्यानुग्राहकतां दधति, तदा एषां सङ्कीर्यमाणस्वरूपत्वात् सङ्करोऽलङ्कार:। अत्र अलङ्कारा: अनुग्राह्यानुग्राहकभावस्य धारणं कुर्वन्ति। यथा -

जटाभाभिर्भाभि: करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविशद:।
परिप्रेङ्खत्तारापरिकरकपालाङ्कितलते
शशी भस्मापाण्डु: पितृवन इव व्योम्नि चरति॥

अत्र **'पतृवन इव व्योम्नि'** इत्यत्र उपमालङ्कार:। **'कलङ्क एव अक्षवलय:'** तथा च **'तारापरिकर एव कपालास्थि'** इत्यत्र रूपकालङ्कार:। **'वियोगिव्यापत्तेरिव'** इत्यत्र उत्प्रेक्षालङ्कार:। एवं **'कलितवैराग्यविशद:'** इत्यत्र श्लेषालङ्कार: वर्तते। अत्र उपमारूपकोत्प्रेक्षाश्लेषादीनाम्-अलङ्काराणाम् अङ्गाङ्गिभाव: वर्तते। अत: अङ्गाङ्गिभावसङ्कर:। **२. सन्देहसङ्कर: एकस्य च ग्रहे न्यायदोषाभावादनिश्चय:।** एकस्य अलङ्कारस्य परिग्रहे साधकप्रमाणस्य वा बाधकप्रमाणस्य अभावात् अनिश्चय: भवति तत्र सन्देहालङ्कार:। यथा -

यथा गभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छाय:।
तथा किं विधिना एष सरसपानीयो जलनिधिर्न कृत:॥

अत्र - १. समुद्रे प्रस्तुते विशेषणसाम्यात् अप्रस्तुतार्थप्रतीते: किमसौ समासोक्ति:। २. अप्रस्तुतसमुद्रद्वारा प्रस्तुतस्य पुरुषस्य प्रतीते: इयमप्रस्तुतप्रशंसा इति सन्देह:।
३. एकाश्रयानुप्रवेशसङ्कर :-

स्फुटमेकत्र विषये शब्दार्थालङ्कृतिद्वयम्। व्यवस्थितं च।

यत्र एकत्र विषये (पदे) शब्दालङ्कारार्थालङ्कारयो: च स्पष्टरूपेण - व्यवस्थितरूपेण च स्थिति: एकाश्रयानुप्रवेशसङ्कर:। यथा -

स्पष्टोल्लसत्किरणकेसरसूर्यबिम्बविस्तीर्णकर्णिकमथो दिवसारविन्दम्।
श्लिष्टाष्टदिग्दलकलापमुखावतारबद्धान्धकारमधुपावलि सञ्चुकोच॥

अत्र किरणकेसरेत्यत्र, सूर्यबिम्बविस्तीर्णकर्णिकेत्यत्र, दिग्दलकलापेत्यत्र चेति पादत्रये प्रत्येकं रूपकानुप्रासौ प्रविष्टौ। अत: एकाश्रयानुप्रवेशसङ्कर:।

॥ इति अर्थालङ्कारनिर्णयो नाम दशम उल्लास: समाप्त:॥

ISBN - 13 - 078-81-925721-4-7

Shree Somnath Sanskrit University - Veraval.
Veraval- 362 266, Dist : Junagadh (Guj.) India
Phone : 02876 - 244528, 29, 32 Fax : 244417
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info